# Shiva Gita

# શ્રીશિવગીતા

## Document Information

Text title : Shiva Gita

File name : shivagiitaa.itx

Category : gItA, giitaa

Location : doc_giitaa

Author : Traditional (Vyasa)

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : From Padma Purana

Latest update : August 28, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 28, 2021

*sanskritdocuments.org*

# શ્રીશિવગીતા

॥ શિવ ગીતા ॥

અથ શ્રીપદ્મપુરાણે ઉપરિભાગે શિવગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શિવરાઘવસંવાદે

૧ શિવભક્ત્યુત્કર્ષનિરૂપણં નામ પ્રથમોઽધ્યાયઃ ॥ ૧ ॥ ૪૦
૨ વૈરાગ્યોપદેશો નામ દ્વિતીયોઽધ્યાયઃ ॥ ૨ ॥ ૪૩
૩ વિરજાદીક્ષાનિરૂપણં નામ તૃતીયોઽધ્યાયઃ ॥ ૩ ॥ ૩૫
૪ શિવપ્રદુર્ભાવાખ્યઃ નામ ચતુર્થોઽધ્યાયઃ ॥ ૪ ॥ ૫૨
૫ રામાય વરપ્રદાનં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૫ ॥ ૪૧
૬ વિભૂતિયોગો નામ ષષ્ઠોઽધ્યાયઃ ॥ ૬ ॥ ૬૦
૭ વિશ્વરૂપદર્શનં નામ સપ્તમોઽધ્યાયઃ ॥ ૭ ॥ ૪૭
૮ પિણ્ડોત્પત્તિકથનં નામ અષ્ટમોઽધ્યાયઃ ॥ ૮ ॥ ૭૦
૯ દેહસ્વરૂપનિર્ણયો નામ નવમોઽધ્યાયઃ ॥ ૯ ॥ ૫૧
૧૦ જીવસ્વરૂપકથનં નામ દશમોઽધ્યાયઃ ॥ ૧૦ ॥ ૬૩
૧૧ જીવગત્યાદિનિરૂપણં નામ એકાદશોઽધ્યાયઃ ॥ ૧૧ ॥ ૪૫
૧૨ ઉપાસનાજ્ઞાનફલં નામ દ્વાદશોઽધ્યાયઃ ॥ ૧૨ ॥ ૪૨
૧૩ મોક્ષયોગો નામ ત્રયોદશોઽધ્યાયઃ ॥ ૧૩ ॥ ૩૮
૧૪ પઞ્ચકોશોપપાદનં નામ ચતુર્દશોઽધ્યાયઃ ॥ ૧૪ ॥ ૪૫
૧૫ ભક્તિયોગો નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૧૫ ॥ ૪૨
૧૬ ગીતાધિકારિનિરૂપણં નામ ષોડશોઽધ્યાયઃ ॥ ૧૬ ॥ ૬૯ ટ્ = ૭૮૩

---

॥ શિવ ગીતા ॥

અથ પ્રથમોઽધ્યાયઃ ।

સૂત ઉવાચ ॥

અથાતઃ સમ્પ્રવક્ષ્યામિ શુદ્ધં કૈવલ્યમુક્તિદમ્ ।

અનુગ્રહાન્મહેશસ્ય ભવદુઃખસ્ય ભેષજમ્ ॥ ૧॥

ન કર્મણામનુષ્ઠાનૈર્ન દાનૈસ્તપસાપિ વા ।
કૈવલ્યં લભતે મર્ત્યઃ કિંતુ જ્ઞાનેન કેવલમ્ ॥ ૨॥

રામાય દણ્ડકારણ્યે પાર્વતીપતિના પુરા ।
યા પ્રોક્તા શિવગીતાખ્યા ગુહ્યાદ્ગુહ્યતમા હિ સા ॥ ૩॥

યસ્યાઃ શ્રવણમાત્રેણ નૃણાં મુક્તિર્ધ્રુવં ભવેત્ ।
પુરા સનત્કુમારાય સ્કન્દેનાભિહિતા હિ સા ॥ ૪॥

સનત્કુમારઃ પ્રોવાચ વ્યાસાય મુનિસત્તમાઃ ।
મહ્યં કૃપાતિરેકેણ પ્રદદૌ બાદરાયણઃ ॥ ૫॥

ઉક્તં ચ તેન કસ્મૈચિન્ન દાતવ્યમિદં ત્વયા ।
સૂતપુત્રાન્યથા દેવાઃ ક્ષુભ્યન્તિ ચ શપન્તિ ચ ॥ ૬॥

અથ પૃષ્ટો મયા વિપ્રા ભગવાન્બાદરાયણઃ ।
ભગવન્દેવતાઃ સર્વાઃ કિં ક્ષુભ્યન્તિ શપન્તિ ચ ॥ ૭॥

તાસામત્રાસ્તિ કા હાનિર્યયા કુપ્યન્તિ દેવતાઃ ।
પારાશર્યોઽથ મામાહ યત્પૃષ્ટં શ‍ૃણુ વત્સ તત્ ॥ ૮॥

નિત્યાગ્નિહોત્રિણો વિપ્રાઃ સંતિ યે ગૃહમેધિનઃ ।
ત એવ સર્વફલદાઃ સુરાણાં કામધેનવઃ ॥ ૯॥

ભક્ષ્યં ભોજ્યં ચ પેયં ચ યદ્યદિષ્ટં સુપર્વણામ્ ।
અગ્નૌ હુતેન હવિષા સત્સર્વં લભ્યતે દિવિ ॥ ૧૦॥

નાન્યદસ્તિ સુરેશાનામિષ્ટસિદ્ધિપ્રદં દિવિ ।
દોગ્ધ્રી ધેનુર્યથા નીતા દુઃખદા ગૃહમેધિનામ્ ॥ ૧૧॥

તથૈવ જ્ઞાનવાન્વિપ્રો દેવાનાં દુઃખદો ભવેત્ ।
ત્રિદશાસ્તેન વિઘ્નન્તિ પ્રવિષ્ટા વિષયં નૃણામ્ ॥ ૧૨॥

તતો ન જાયતે ભક્તિઃ શિવે કસ્યાપિ દેહિનઃ ।
તસ્માદવિદુષાં નૈવ જાયતે શૂલપાણિનઃ ॥ ૧૩॥

યથાકથંચિજ્જાતાપિ મધ્યે વિચ્છિદ્યતે નૃણામ્ ।
જાતં વાપિ શિવજ્ઞાનં ન વિશ્વાસં ભજત્યલમ્ ॥ ૧૪॥

ઋષય ઊચુઃ ॥

યદ્યેવં દેવતા વિઘ્નમાચરન્તિ તનૂભૃતામ્ ।
પૌરુષં તત્ર કસ્યાસ્તિ યેન મુક્તિર્ભવિષ્યતિ ॥ ૧૫॥

સત્યં સૂતાત્મજ બ્રૂહિ તત્રોપાયોઽસ્તિ વા ન વા ॥

સૂત ઉવાચ ॥

કોટિજન્માર્જિતૈઃ પુણ્યૈઃ શિવે ભક્તિઃ પ્રજાયતે ॥ ૧૬॥

ઇષ્ટાપૂર્તાદિકર્માણિ તેનાચરતિ માનવઃ ।
શિવાર્પણધિયા કામાન્પરિત્યજ્ય યથાવિધિ ॥ ૧૭॥

અનુગ્રહાત્તેન શંભોર્જાયતે સુદૃઢો નરઃ ।
તતો ભીતાઃ પલાયન્તે વિઘ્નં હિત્વા સુરેશ્વરાઃ ॥ ૧૮॥

જાયતે તેન શુશ્રૂષા ચરિતે ચન્દ્રમૌલિનઃ ।
શ ૃણ્વતો જાયતે જ્ઞાનં જ્ઞાનાદેવ વિમુચ્યતે ॥ ૧૯॥

બહુનાત્ર વિમુક્તેન યસ્ય ભક્તિઃ શિવે દૃઢા ।
મહાપાપોપપાપૌઘકોટિગ્રસ્તોઽપિ મુચ્યતે ॥ ૨૦॥

અનાદરેણ શાઠ્યેન પરિહાસેન માયયા ।
શિવભક્તિરતશ્ચેત્સ્યાદન્ત્યજોઽપિ વિમુચ્યતે ॥ ૨૧॥

એવં ભક્તિશ્ચ સર્વેષાં સર્વદા સર્વતોમુખી ।
તસ્યાં તુ વિદ્યમાનાયાં યસ્તુ મર્ત્યો ન મુચ્યતે ॥ ૨૨॥

સંસારબન્ધનાત્તસ્માદન્યઃ કો વાસ્તિ મૂઢધીઃ ।
નિયમાદ્યસ્તુ કુર્વીત ભક્તિં વા દ્રોહમેવ વા ॥ ૨૩॥

તસ્યાપિ ચેત્પ્રસન્નોઽસૌ ફલં યચ્છતિ વાઞ્છિતમ્ ।
ઋદ્ધં કિંચિત્સમાદાય ક્ષુલ્લકં જલમેવ વા ॥ ૨૪॥

યો દત્તે નિયમેનાસૌ તસ્મૈ દત્તે જગત્ત્રયમ્ ।
તત્રાપ્યશક્તો નિયમાન્નમસ્કારં પ્રદક્ષિણામ્ ॥ ૨૫॥

યઃ કરોતિ મહેશસ્ય તસ્મૈ તુષ્ટો ભવેચ્છિવઃ ।
પ્રદક્ષિણાસ્વશક્તોઽપિ યઃ સ્વાન્તે ચિન્તયેચ્છિવમ્ ॥ ૨૬॥

ગચ્છન્સમુપવિષ્ટો વા તસ્યાભીષ્ટં પ્રયચ્છતિ ।

ચન્દનં બિલ્વકાષ્ઠસ્ય પુષ્પાણિ વનજાન્યપિ ॥ ૨૭॥

ફલાનિ તાદૃશાન્યેવ યસ્ય પ્રીતિકરાણિ વૈ ।
દુષ્કરં તસ્ય સેવાયાં કિમસ્તિ ભુવનત્રયે ॥ ૨૮॥

વન્યેષુ યાદૃશી પ્રીતિર્વર્તતે પરમેશિતુઃ ।
ઉત્તમેષ્વપિ નાસ્ત્યેવ તાદૃશી ગ્રામજેષ્વપિ ॥ ૨૯॥

તં ત્યક્ત્વા તાદૃશં દેવં યઃ સેવેતાન્યદેવતામ્ ।
સ હિ ભાગીરથીં ત્યક્ત્વા કાઙ્ક્ષતે મૃગતૃષ્ણિકામ્ ॥ ૩૦॥

કિંતુ યસ્યાસ્તિ દુરિતં કોટિજન્મસુ સંચિતમ્ ।
તસ્ય પ્રકાશતે નાયમર્થો મોહાન્ધચેતસઃ ॥ ૩૧॥

ન કાલનિયમો યત્ર ન દેશસ્ય સ્થલસ્ય ચ ।
યત્રાસ્ય ચિત્રં રમતે તસ્ય ધ્યાનેન કેવલમ્ ॥ ૩૨॥

આત્મત્વેન શિવસ્યાસૌ શિવસાયુજ્યમાપ્નુયાત્ ।
અતિસ્વલ્પતરાયુઃ શ્રીર્ભૂતેશાંશાધિપોઽપિ યઃ ॥ ૩૩॥

સ તુ રાજાહમસ્મીતિ વાદિનં હન્તિ સાન્વયમ્ ।
કર્તાપિ સર્વલોકાનામક્ષયૈશ્વર્યવાનપિ ॥ ૩૪॥

શિવઃ શિવોઽહમસ્મીતિ વાદિનં યં ચ કઞ્ચન ।
આત્મના સહ તાદાત્મ્યભાગિનં કુરુતે ભૃશમ્ ॥ ૩૫॥

ધર્માર્થકામમોક્ષાણાં પારં યસ્યાથ યેન વૈ ।
મુનયસ્તત્પ્રવક્ષ્યામિ વ્રતં પાશુપતાભિધમ્ ॥ ૩૬॥

કૃત્વા તુ વિરજાં દીક્ષાં ભૂતિરુદ્રાક્ષધારિણઃ ।
જપન્તો વેદસારાખ્યં શિવનામસહસ્રકમ્ ॥ ૩૭॥

સંત્યજ્ય તેન મર્ત્યત્વં શૈવીં તનુમવાપ્સ્યથ ।
તતઃ પ્રસન્નો ભગવાઞ્છંકરો લોકશંકરઃ ॥ ૩૮॥

ભવતાં દૃશ્યતામેત્ય કૈવલ્યં વઃ પ્રદાસ્યતિ ।
રામાય દણ્ડકારણ્યે યત્પ્રાદાત્કુમ્ભસંભવઃ ॥ ૩૯॥

તત્સર્વં વઃ પ્રવક્ષ્યામિ શૃણુધ્વં ભક્તિયોગિનઃ ॥ ૪૦॥

ઇતિ શ્રીપદ્મપુરાણે ઉપરિભાગે શિવગીતાસૂપનિષત્સુ

બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શિવરાઘવસંવાદે
શિવભક્ત્યુત્કર્ષનિરૂપણં નામ પ્રથમોऽધ્યાયઃ ॥ ૧ ॥

---

અથ દ્વિતીયોऽધ્યાયઃ ॥

ઋષય ઊચુઃ ॥

કિમર્થમાગતોऽગસ્ત્યો રામચન્દ્રસ્ય સન્નિધિમ્ ।
કથં વા વિરજાં દીક્ષાં કારયામાસ રાઘવમ્ ।
તતઃ કિમાપ્તવાન્ રામઃ ફલં તદ્વક્તુમર્હસિ ॥ ૧॥

સૂત ઉવાચ ॥

રાવણેન યદા સીતાऽપહૃતા જનકાત્મજા ।
તદા વિયોગદુઃખેન વિલપન્નાસ રાઘવઃ ॥ ૨॥

નિર્નિદ્રો નિરહંકારો નિરાહારો દિવાનિશમ્ ।
મોક્તુમૈચ્છત્તતઃ પ્રાણાન્સાનુજો રઘુનન્દનઃ ॥ ૩॥

લોપામુદ્રાપતિર્જ્ઞાત્વા તસ્ય સન્નિધિમાગમત્ ।
અથ તં બોધયામાસ સંસારાસારતાં મુનિઃ ॥ ૪॥

અગસ્ત્ય ઉવાચ ॥

કિં વિષીદસિ રાજેન્દ્ર કાન્તા કસ્ય વિચાર્યતામ્ ।
જડઃ કિં નુ વિજાનાતિ દેહોऽયં પાઞ્ચભૌતિકઃ ॥ ૫॥

નિર્લેપઃ પરિપૂર્ણશ્ચ સચ્ચિદાનન્દવિગ્રહઃ ।
આત્મા ન જાયતે નૈવ મ્રિયતે ન ચ દુઃખભાક્ ॥ ૬॥

સૂર્યોऽસૌ સર્વલોકસ્ય ચક્ષુષ્ટ્વેન વ્યવસ્થિતઃ ।
તથાપિ ચાક્ષુષૈર્દોષૈર્ન કદાચિદ્વિલિપ્યતે ॥ ૭॥

સર્વભૂતાન્તરાત્માપિ તદ્વદ્દૃશ્યૈર્ન લિપ્યતે ।
દેહોऽપિ મલપિણ્ડોऽયં મુક્તજીવો જડાત્મકઃ ॥ ૮॥

દહ્યતે વહ્નિના કાષ્ઠૈઃ શિવાદ્યૈર્ભક્ષ્યતેऽપિ વા ।
તથાપિ નૈવ જાનાતિ વિરહે તસ્ય કા વ્યથા ॥ ૯॥

સુવર્ણગૌરી દૂર્વાયા દલવચ્છ્યામલાપિ વા ।

પીનોત્તુઙ્ગસ્તનાભોગભુગ્નસૂક્ષ્મવલગ્નિકા ॥ ૧૦॥

બૃહન્નિતમ્બજઘના રક્તપાદસરોરુહા ।
રાકાચન્દ્રમુખી બિમ્બપ્રતિબિમ્બરદચ્છદા ॥ ૧૧॥

નીલેન્દીવરનીકાશનયનદ્વયશોભિતા ।
મત્તકોકિલસઁલ્લાપા મત્તદ્વિરદગામિની ॥ ૧૨॥

કટાક્ષૈરનુગૃહ્ણાતિ માં પઞ્ચેષુશરોત્તમૈઃ ।
ઇતિ યાં મન્યતે મૂઢ સ તુ પઞ્ચેષુશાસિતઃ ॥ ૧૩॥

તસ્યાવિવેકં વક્ષ્યામિ શ‍ૃણુષ્વાવહિતો નૃપ ।
ન ચ સ્ત્રી ન પુમાનેષ નૈવ ચાયં નપુંસકઃ ॥ ૧૪॥

અમૂર્તઃ પુરુષઃ પૂર્ણો દ્રષ્ટા દેહી સ જીવિનઃ ।
યા તન્વઙ્ગી મૃદુર્બાલા મલપિણ્ડાત્મિકા જડા ॥ ૧૫॥

સા ન પશ્યતિ યત્કિંચિન્ન શ‍ૃણોતિ ન જિઘ્રતિ ।
ચર્મમાત્રા તનુસ્તસ્યા બુદ્ધ્વા ત્યક્ષસ્વ રાઘવ ॥ ૧૬॥

યા પ્રાણાદધિકા સૈવ હંત તે સ્યાદ્ઘૃણાસ્પદમ્ ।
જાયન્તે યદિ ભૂતેભ્યો દેહિનઃ પાઞ્ચભૌતિકાઃ ॥ ૧૭॥

આત્મા યદેકલસ્તેષુ પરિપૂર્ણઃ સનાતનઃ ।
કા કાન્તા તત્ર કઃ કાન્તઃ સર્વ એવ સહોદરાઃ ॥ ૧૮॥

નિર્મિતાયાં ગૃહાવલ્યાં તદવચ્છિન્નતાં ગતમ્ ।
નભસ્તસ્યાં તુ દગ્ધાયાં ન કાંચિત્ક્ષતિમૃચ્છતિ ॥ ૧૯॥

તદ્વદાત્માપિ દેહેષુ પરિપૂર્ણઃ સનાતનઃ ।
હન્યમાનેષુ તેષ્વેવ સ સ્વયં નૈવ હન્યતે ॥ ૨૦॥

હન્તા ચેન્મન્યતે હન્તું હતશ્ચેન્મન્યતે હતમ્ ।
તાવુભૌ ન વિજાનીતો નાયં હન્તિ ન હન્યતે ॥ ૨૧॥

અસ્માન્નૃપાતિદુઃખેન કિં ખેદસ્યાસ્તિ કારણમ્ ।
સ્વસ્વરૂપં વિદિત્વેદં દુઃખં ત્યક્ત્વા સુખી ભવ ॥ ૨૨॥

રામ ઉવાચ ॥

મુને દેહસ્ય નો દુઃખં નૈવ ચેત્પરમાત્મનઃ ।

સીતાવિયોગદુઃખાગ્નિર્માં ભસ્મીકુરુતે કથમ્ ॥ ૨૩॥

સદાઽનુભૂયતે યોઽર્થઃ સ નાસ્તીતિ ત્વયેરિતઃ ।
જાયાતાં તત્ર વિશ્વાસઃ કથં મે મુનિપુઙ્ગવ ॥ ૨૪॥

અન્યોઽત્ર નાસ્તિ કો ભોક્તા યેન જન્તુઃ પ્રતપ્યતે ।
સુખસ્ય વાપિ દુઃખસ્ય તદ્બ્રૂહિ મુનિસત્તમ ॥ ૨૫॥

અગસ્ત્ય ઉવાચ ॥

દુર્જ્ઞેયા શાંભવી માયા તયા સંમોહ્યતે જગત્ ।
માયા તુ પ્રકૃતિં વિદ્યાન્માયિનં તુ મહેશ્વરમ્ ।૨૬॥

તસ્યાવયવભૂતૈસ્તુ વ્યાપ્તં સર્વમિદં જગત્।
સત્યજ્ઞાનાત્મકોઽનન્તો વિભુરાત્મા મહેશ્વરઃ ॥ ૨૭॥

તસ્યૈવાંશો જીવલોકે હૃદયે પ્રાણિનાં સ્થિતઃ ।
વિસ્ફુલિઙ્ગા યથા વહ્નેર્જાયન્તે કાષ્ઠયોગતઃ ॥ ૨૮॥

અનાદિકર્મસંબદ્ધાસ્તદ્વદંશા મહેશિતુઃ ।
અનાદિવાસનાયુક્તાઃ ક્ષેત્રજ્ઞા ઇતિ તે સ્મૃતાઃ ॥ ૨૯॥

મનો બુદ્ધિરહંકારશ્ચિત્તં ચેતિ ચતુષ્ટયમ્ ।
અન્તઃકરણમિત્યાહુસ્તત્ર તે પ્રતિબિમ્બિતાઃ ॥ ૩૦॥

જીવત્વં પ્રાપ્નુયુઃ કર્મફલભોક્તાર એવ તે ।
તતો વૈષયિકં તેષાં સુખં વા દુઃખમેવ વા ॥ ૩૧॥

ત એવ ભુઞ્જતે ભોગાયતનેઽસ્મિન્ શરીરકે ।
સ્થાવરં જઙ્ગમં ચેતિ દ્વિવિધં વપુરુચ્યતે ॥ ૩૨॥

સ્થાવરાસ્તત્ર દેહાઃ સ્યુઃ સૂક્ષ્મા ગુલ્મલતાદયઃ ।
અણ્ડજાઃ સ્વેદજાસ્તદ્વદુદ્ભિજ્જા ઇતિ જઙ્ગમાઃ ॥ ૩૩॥

યોનિમન્યે પ્રપદ્યન્તે શરીરત્વાય દેહિનઃ ।
સ્થાણુમન્યેઽનુસંયન્તિ યથાકર્મ યથાશ્રુતમ્ ॥ ૩૪॥

સુખ્યહં દુઃખ્યહં ચેતિ જીવ એવાભિમન્યતે ।
નિર્લેપોઽપિ પરં જ્યોતિર્મોહિતઃ શંભુમાયયા ॥ ૩૫॥

કામઃ ક્રોધસ્તથા લોભો મદો માત્સર્યમેવ ચ ।

મોહશ્ચેત્યરિષડ્વર્ગમહંકારગતં વિદુઃ ॥ ૩૬॥

સ એવ બધ્યતે જીવઃ સ્વપ્નજાગ્રદવસ્થયોઃ ।
સુષુપ્તૌ તદભાવાચ્ચ જીવઃ શંકરતાં ગતઃ ॥ ૩૭॥

સ એવ માયાસંસ્પૃષ્ટઃ કારણં સુખદુઃખયોઃ ।
શુક્તૌ રજતવદ્વિશ્વં માયયા દૃશ્યતે શિવે ॥ ૩૮॥

તતો વિવેકજ્ઞાનેન ન કોઽપ્યત્રાસ્તિ દુઃખભાક્ ।
તતો વિરમ દુઃખાત્ત્વં કિં મુધા પરિતપ્યસે ॥ ૩૯॥

શ્રીરામ ઉવાચ ॥

મુને સર્વમિદં તથ્યં યન્મદગ્રે ત્વયેરિતમ્ ।
તથાપિ ન જહાત્યેતત્પ્રારબ્ધાદૃષ્ટમુલ્બણમ્ ॥ ૪૦॥

મત્તં કુર્યાદ્યથા મદ્યં નષ્ટાવિદ્યમપિ દ્વિજમ્ ।
તદ્વત્પ્રારબ્ધભોગોઽપિ ન જહાતિ વિવેકિનમ્ ॥ ૪૧॥

તતઃ કિં બહુનોક્તેન પ્રારબ્ધસચિવઃ સ્મરઃ ।
બાધતે માં દિવારાત્રમહંકારોઽપિ તાદૃશઃ ॥ ૪૨॥

અત્યન્તપીડિતો જીવઃ સ્થૂલદેહં વિમુઞ્ચતિ ।
તસ્માજ્જીવાપ્તયે મહ્યમુપાયઃ ક્રિયતાં દ્વિજ ॥ ૪૩॥

ઇતિ શ્રીપદ્મપુરાણે ઉપરિભાગે શિવગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શિવરાઘવસંવાદે
વૈરાગ્યોપદેશો નામ દ્વિતીયોઽધ્યાયઃ ॥ ૨ ॥

---

અથ તૃતીયોઽધ્યાયઃ ॥

અગસ્ત્ય ઉવાચ ॥

ન ગૃહ્ણાતિ વચઃ પથ્યં કામક્રોધાદિપીડિતઃ ।
હિતં ન રોચતે તસ્ય મુમૂર્ષોરિવ ભેષજમ્ ॥ ૧॥

મધ્યેસમુદ્રં યા નીતા સીતા દૈત્યેન માયિના ।
આયાસ્યતિ નરશ્રેષ્ઠ સા કથં તવ સંનિધિમ્ ॥ ૨॥

બધ્યન્તે દેવતાઃ સર્વા દ્વારિ મર્કટયૂથવત્ ।

કિં ચ ચામરધારિણ્યો યસ્ય સંતિ સુરાઙ્ગનાઃ ॥ ૩॥

ભુઙ્ક્તે ત્રિલોકીમખિલાં યઃ શંભુવરદર્પિતઃ ।
નિષ્કણ્ટકં તસ્ય જયઃ કથં તવ ભવિષ્યતિ ॥ ૪॥

ઇન્દ્રજિન્નામ પુત્રો યસ્તસ્યાસ્તીશવરોદ્ધતઃ ।
તસ્યાગ્રે સંગરે દેવા બહુવારં પલાયિતાઃ ॥ ૫॥

કુમ્ભકર્ણાહ્વયો ભ્રાતા યસ્યાસ્તિ સુરસૂદનઃ ।
અન્યો દિવ્યાસ્ત્રસંયુક્તશ્ચિરજીવી બિભીષણઃ ॥ ૬॥

દુર્ગં યસ્યાસ્તિ લંકાખ્યં દુર્જેયં દેવદાનવૈઃ ।
ચતુરઙ્ગબલં યસ્ય વર્તતે કોટિસંખ્યયા ॥ ૭॥

એકાકિના ત્વયા જેયઃ સ કથં નૃપનન્દન ।
આકાંક્ષતે કરે ધર્તું બાલશ્ચન્દ્રમસં યથા ।
તથા ત્વં કામમોહેન જયં તસ્યાભિવાઞ્છસિ ॥ ૮॥

શ્રીરામ ઉવાચ ॥

ક્ષત્રિયોઽહં મુનિશ્રેષ્ઠ ભાર્યા મે રક્ષસા હૃતા ।
યદિ તં ન નિહન્મ્યાશુ જીવને મેઽસ્તિ કિં ફલમ્ ॥ ૯॥

અતસ્તે તત્ત્વબોધેન ન મે કિંચિત્પ્રયોજનમ્ ।
કામક્રોધાદયઃ સર્વે દહન્ત્યેતે તનું મમ ॥ ૧૦॥

અહંકારોઽપિ મે નિત્યં જીવનં હન્તુમુદ્યતઃ ।
હૃતાયાં નિજકાન્તાયાં શત્રુણાઽવમતસ્ય વા ॥ ૧૧॥

યસ્ય તત્ત્વબુભુત્સા સ્યાત્સ લોકે પુરુષાધમઃ ।
તસ્માત્તસ્ય વધોપાયં લઙ્ઘયિત્વામ્બુધિં રણે ॥ ૧૨॥

અગસ્ત્ય ઉવાચ ॥

એવં ચેચ્છરણં યાહિ પાર્વતીપતિમવ્યયમ્ ।
સ ચેત્પ્રસન્નો ભગવાન્વાઞ્છિતાર્થં પ્રદાસ્યતિ ॥ ૧૩॥

દેવૈરજેયઃ શક્રાદ્યૈર્હરિણા બ્રહ્મણાપિ વા ।
સ તે વધ્યઃ કથં વા સ્યાચ્છંકરાનુગ્રહં વિના ॥

અતસ્ત્વાં દીક્ષયિષ્યામિ વિરજામાર્ગમાશ્રિતઃ ।

તેન માર્ગેન મર્ત્યત્વં હિત્વા તેજોમયો ભવ ॥ ૧૫॥

યેન હત્વા રણે શત્રૂન્સર્વાન્કામાનવાપ્સ્યસિ ।
ભુક્ત્વા ભૂમણ્ડલે ચાન્તે શિવસાયુજ્યમાપ્સ્યસિ ॥ ૧૬॥

સૂત ઉવાચ ॥

અથ પ્રણમ્ય રામસ્તં દણ્ડવન્મુનિસત્તમમ્ ।
ઉવાચ દુઃખનિર્મુક્તઃ પ્રહૃષ્ટેનાન્તરાત્મના ॥ ૧૭॥

શ્રીરામ ઉવાચ ॥

કૃતાર્થોઽહં મુને જાતો વાઞ્છિતાર્થો મમાગતઃ ।
પીતામ્બુધિઃ પ્રસન્નસ્ત્વં યદિ મે કિમુ દુર્લભમ્ ।
અતસ્ત્વં વિરજાં દીક્ષાં બ્રૂહિ મે મુનિસત્તમ ॥ ૧૮॥

અગસ્ત્ય ઉવાચ ॥

શુક્લપક્ષે ચતુર્દશ્યામષ્ટમ્યાં વા વિશેષતઃ ।
એકાદશ્યાં સોમવારે આર્દ્રાયાં વા સમારભેત્ ॥ ૧૯॥

યં વાયુમાહુર્યં રુદ્રં યમગ્નિં પરમેશ્વરમ્ ।
પરાત્પરતરં ચાહુઃ પરાત્પરતરં શિવમ્ ॥ ૨૦॥

બ્રહ્મણો જનકં વિષ્ણોર્વહ્નેર્વાયોઃ સદાશિવમ્ ।
ધ્યાત્વાગ્નિનાઽવસથ્યાગ્નિં વિશોધ્ય ચ પૃથક્પૃથક્ ॥ ૨૧॥

પઞ્ચભૂતાનિ સંયમ્ય ધ્યાત્વા ગુણવિધિક્રમાત્ ।
માત્રાઃ પઞ્ચ ચતસ્રશ્ચ ત્રિમાત્રાદિસ્તતઃ પરમ્ ॥ ૨૨॥

એકમાત્રમમાત્રં હિ દ્વાદશાન્તં વ્યવસ્થિતમ્ ।
સ્થિત્યાં સ્થાપ્યામૃતો ભૂત્વા વ્રતં પાશુપતં ચરેત્ ॥ ૨૩॥

ઇદં વ્રતં પાશુપતં કરિષ્યામિ સમાસતઃ ।
પ્રાતરેવં તુ સંકલ્પ્ય નિધાયાગ્નિં સ્વશાખયા ॥ ૨૪॥

ઉપોષિતઃ શુચિઃ સ્નાતઃ શુક્લામ્બરધરઃ સ્વયમ્ ।
શુક્લયજ્ઞોપવીતશ્ચ શુક્લમાલ્યાનુલેપનઃ ॥ ૨૫॥

જુહુયાદ્વિરજામન્ત્રૈઃ પ્રાણાપાનાદિભિસ્તતઃ ।
અનુવાકાન્તમેકાગ્રઃ સમિદાજ્યચરૂન્પૃથક્ ॥ ૨૬॥

આત્મન્યગ્નિં સમારોપ્ય યાતે અગ્નેતિ મંત્રતઃ ।
ભસ્માદાયાગ્નિરિત્યાદ્યૈર્વિમૃજ્યાઙ્ગાનિ સંસ્પૃશેત્ ॥ ૨૭॥

ભસ્મચ્છન્નો ભવેદ્વિદ્વાન્મહાપાતકસંભવૈઃ ।
પાપૈર્વિમુચ્યતે સત્યં મુચ્યતે ચ ન સંશયઃ ॥ ૨૮॥

વીર્યમગ્નેર્યતો ભસ્મ વીર્યવાન્ભસ્મસંયુતઃ ।
ભસ્મસ્નાનરતો વિપ્રો ભસ્મશાયી જિતેન્દ્રિયઃ ॥ ૨૯॥

સર્વપાપવિનિર્મુક્તઃ શિવસાયુજ્યમાપ્નુયાત્ ।
એવં કુરુ મહાભાગ શિવનામસહસ્રકમ્ ॥ ૩૦॥

ઇદં તુ સમ્પ્રદાસ્યામિ તેન સર્વાર્થમાપ્સ્યસિ ।
સૂત ઉવાચ ॥

ઇત્યુક્ત્વા પ્રદદૌ તસ્મૈ શિવનામસહસ્રકમ્ ॥ ૩૧॥

વેદસારાભિધં નિત્યં શિવપ્રત્યક્ષકારકમ્ ।
ઉક્તં ચ તેન રામ ત્વં જપ નિત્યં દિવાનિશમ્ ॥ ૩૨॥

તતઃ પ્રસન્નો ભગવાન્મહાપાશુપતાસ્ત્રકમ્ ।
તુભ્યં દાસ્યતિ તેન ત્વં શત્રૂન્હત્વાઽઽપ્સ્યસિ પ્રિયામ્ ॥ ૩૩॥

તસ્યૈવાસ્ત્રસ્ય માહાત્મ્યાત્સમુદ્રં શોષયિષ્યસિ ।
સંહારકાલે જગતામસ્ત્રં તત્પાર્વતીપતેઃ ॥ ૩૪॥

તદલાભે દાનવાનાં જયસ્તવ સુદુર્લભઃ ।
તસ્માલ્લબ્ધં તદેવાસ્ત્રં શરણં યાહિ શંકરમ્ ॥ ૩૫॥

ઇતિ શ્રીપદ્મપુરાણે ઉપરિભાગે શિવગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શિવરાઘવસંવાદે
વિરજાદીક્ષાનિરૂપણં નામ તૃતીયોઽધ્યાયઃ ॥ ૩ ॥

---

અથ ચતુર્થોઽધ્યાયઃ ॥

સૂત ઉવાચ ॥

એવમુક્ત્વા મુનિશ્રેષ્ઠ ગતે તસ્મિન્નિજાશ્રમમ્ ।
અથ રામગિરૌ રામસ્તસ્મિન્ગોદાવરીતટે ॥ ૧॥

શિવલિઙ્ગં પ્રતિષ્ઠાપ્ય કૃત્વા દીક્ષાં યથાવિધિ ।
ભૂતિભૂષિતસર્વાઙ્ગો રુદ્રાક્ષાભરણૈર્યુતઃ ॥ ૨॥

અભિષિચ્ય જલૈઃ પુણ્યૈર્ગૌતમીસિન્ધુસંભવૈઃ ।
અર્ચયિત્વા વન્યપુષ્પૈસ્તદ્વદ્વન્યફલૈરપિ ॥ ૩॥

ભસ્મચ્છન્નો ભસ્મશાયી વ્યાઘ્રચર્માસને સ્થિતઃ ।
નામ્નાં સહસ્રં પ્રજપન્નક્તંદિવમનન્યધીઃ ॥ ૪॥

માસમેકં ફલાહારો માસં પર્ણાશનઃ સ્થિતઃ ।
માસમેકં જલાહારો માસં ચ પવનાશનઃ ॥ ૫॥

શાન્તો દાન્તઃ પ્રસન્નાત્મા ધ્યાયન્નેવં મહેશ્વરમ્ ।
હૃત્પઙ્કજે સમાસીનમુમાદેહાર્ધધારિણમ્ ॥ ૬॥

ચતુર્ભુજં ત્રિનયનં વિદ્યુત્પિઙ્ગજટાધરમ્ ।
કોટિસૂર્યપ્રતીકાશં ચન્દ્રકોટિસુશીતલમ્ ॥ ૭॥

સર્વાભરણસંયુક્તં નાગયજ્ઞોપવીતિનમ્ ।
વ્યાઘ્રચર્મામ્બરધરં વરદાભયધારિણમ્ ॥ ૮॥

વ્યાઘ્રચર્મોત્તરીયં ચ સુરાસુરનમસ્કૃતમ્ ।
પઞ્ચવક્ત્રં ચન્દ્રમૌલિં ત્રિશૂલડમરૂધરમ્ ॥ ૯॥

નિત્યં ચ શાશ્વતં શુદ્ધં ધ્રુવમક્ષરમવ્યયમ્ ।
એવં નિત્યં પ્રજપતો ગતં માસચતુષ્ટયમ્ ॥ ૧૦॥

અથ જાતો મહાનાદઃ પ્રલયામ્બુદભીષણઃ ।
સમુદ્રમથનોદ્ભૂતમન્દરાવનિભૃદ્ધ્વનિઃ ॥ ૧૧॥

રુદ્રબાણાગ્નિસંદીપ્તભ્રશ્યત્ત્રિપુરવિભ્રમઃ ।
તમાકર્ણ્યાથ સંભ્રાન્તો યાવત્પશ્યતિ પુષ્કરમ્ ॥ ૧૨॥

તાવદ્દેવો મહાતેજો સમસ્યાસીત્પુરો દ્વિજાઃ ।
તેજસા તેન સંભ્રાન્તો નાપશ્યત્સ દિશો દશ ॥ ૧૩॥

અન્ધીકૃતેક્ષણસ્તૂર્ણં મોહં યાતો નૃપાત્મજઃ ।
વિચિન્ત્ય તર્કયામાસ દૈત્યમાયાં દ્વિજેશ્વરાઃ ॥ ૧૪॥

અથોત્થાય મહાવીરઃ સજ્જં કૃત્વા સ્વકં ધનુઃ ।
અવિધ્યન્નિશિતૈર્બાણૈર્દિવ્યાસ્ત્રૈરભિમન્ત્રિતૈઃ ॥ ૧૫॥

આગ્નેયં વારુણં સૌમ્યં મોહનં સૌરપાર્વતમ્ ।
વિષ્ણુચક્રં મહાચક્રં કાલચક્રં ચ વૈષ્ણવમ્ ॥ ૧૬॥

રૌદ્રં પાશુપતં બ્રાહ્મં કૌબેરં કુલિશાનિલમ્ ।
ભાર્ગવાદિબહૂન્યસ્ત્રાણ્યયં પ્રાયુઙ્ક્ત રાઘવઃ ॥ ૧૭॥

તસ્મિંસ્તેજસિ શસ્ત્રાણિ ચાસ્ત્રાન્યસ્ય મહીપતેઃ ।
વિલીનાનિ મહાભ્રસ્ય કરકા ઇવ નીરધૌ ॥ ૧૮॥

તતઃ ક્ષણેન જજ્વાલ ધનુસ્તસ્ય કરચ્ચ્યુતમ્ ।
તૂણીરં ચાઙ્ગુલિત્રાણં ગોધિકાપિ મહીપતે ॥ ૧૯॥

તદ્દૃષ્ટ્વા લક્ષ્મણો ભીતઃ પપાત ભુવિ મૂર્ચ્છિતઃ ।
અથાકિઞ્ચિત્કરો રામો જાનુભ્યામવનિં ગતઃ ॥ ૨૦॥

મીલિતાક્ષો ભયાવિષ્ટઃ શંકરં શરણં ગતઃ ।
સ્વરેણાપ્યુચ્ચરન્નુચ્ચૈઃ શંભોર્નામસહસ્રકમ્ ॥ ૨૧॥

શિવં ચ દણ્ડવદ્ભૂમૌ પ્રણનામ પુનઃ પુનઃ ।
પુનશ્ચ પૂર્વવચ્ચાસીચ્છબ્દો દિઙ્મણ્ડલં ગ્રસન્ ॥ ૨૨॥

ચચાલ વસુધા ઘોરં પર્વતાશ્ચ ચકમ્પિરે ।
તતઃ ક્ષણેન શીતાંશુશીતલં તેજ આપતત્ ॥ ૨૩॥

ઉન્મીલિતાક્ષો રામસ્તુ યાવદેતત્પ્રપશ્યતિ ।
તાવદ્દદર્શ વૃષભં સર્વાલંકારસંયુતમ્ ॥ ૨૪॥

પીયૂષમથનોદ્ભૂતનવનીતસ્ય પિણ્ડવત્ ।
પ્રોતસ્વર્ણં મરકતચ્છાયશૃઙ્ગદ્વયાન્વિતમ્ ॥ ૨૫॥

નીલરત્નેક્ષણં હ્રસ્વકણ્ઠકમ્બલભૂષિતમ્ ।
રત્નપલ્યાણસંયુક્તં નિબદ્ધં શ્વેતચામરૈઃ ॥ ૨૬॥

ઘણ્ટિકાઘર્ઘરીશબ્દૈઃ પૂરયન્તં દિશો દશ ।
તત્રાસીનં મહાદેવં શુદ્ધસ્ફટિકવિગ્રહમ્ ॥ ૨૭॥

કોટિસૂર્યપ્રતીકાશં કોટિશીતાંશુશીતલમ્ ।
વ્યાઘ્રચર્માંમ્બરધરં નાગયજ્ઞોપવીતિનમ્ ॥ ૨૮॥

સર્વાલંકારસંયુક્તં વિદ્યુત્પિઙ્ગજટાધરમ્ ।

નીલકણ્ઠં વ્યાઘ્રચર્મોત્તરીયં ચન્દ્રશેખરમ્ ॥ ૨૯॥

નાનાવિધાયુધોદ્ભાસિદશબાહું ત્રિલોચનમ્ ।
યુવાનં પુરુષશ્રેષ્ઠં સચ્ચિદાનન્દવિગ્રહમ્ ॥ ૩૦॥

તત્રૈવ ચ સુખાસીનાં પૂર્ણચન્દ્રનિભાનનામ્ ।
નીલેન્દીવરદામાભામુદ્યન્મરકતપ્રભામ્ ॥ ૩૧॥

મુક્તાભરણસંયુક્તાં રાત્રિં તારાઞ્ચિતામિવ ।
વિન્ધ્યક્ષિતિધરોત્તુઙ્ગકુચભારભરાલસામ્ ॥ ૩૨॥

સદસત્સંશયાવિષ્ટમધ્યદેશાન્તરામ્બરામ્ ।
દિવ્યાભરણસંયુક્તાં દિવ્યગન્ધાનુલેપનામ્ ॥ ૩૩॥

દિવ્યમાલ્યામ્બરધરાં નીલેન્દીવરલોચનામ્ ।
અલકોદ્ભાસિવદનાં તામ્બૂલગ્રાસશોભિતામ્ ॥ ૩૪॥

શિવાલિઙ્ગનસંજાતપુલકોદ્ભાસિવિગ્રહામ્ ।
સચ્ચિદાનન્દરૂપાઢ્યાં જગન્માતરમમ્બિકામ્ ॥ ૩૫॥

સૌન્દર્યસારસંદોહાં દદર્શ રઘુનન્દનઃ ।
સ્વસ્વવાહનસંયુક્તાન્નાનાયુધલસત્કરાન્ ॥ ૩૬॥

બૃહદ્રથન્તરાદીનિ સામાનિ પરિગાયતઃ ।
સ્વસ્વકાન્તાસમાયુક્તાન્દિક્પાલાન્પરિતઃ સ્થિતાન્ ॥ ૩૭॥

અગ્રગં ગરુડારૂઢં શંખચક્રગદાધરમ્ ।
કાલામ્બુદપ્રતીકાશં વિદ્યુત્કાન્ત્યા શ્રિયા યુતમ્ ॥ ૩૮॥

જપન્તમેકમનસા રુદ્રાધ્યાયં જનાર્દનમ્ ।
પશ્ચાચ્ચતુર્મુખં દેવં બ્રહ્માણં હંસવાહનમ્ ॥ ૩૯॥

ચતુર્વક્ત્રૈશ્ચતુર્વેદરુદ્રસૂક્તૈર્મહેશ્વરમ્ ।
સ્તુવન્તં ભારતીયુક્તં દીર્ઘકૂર્ચં જટાધરમ્ ॥ ૪૦॥

અથર્વશિરસા દેવં સ્તુવન્તં મુનિમણ્ડલમ્ ।
ગઙ્ગાદિતટિનીયુક્તમમ્બુધિં નીલવિગ્રહમ્ ॥ ૪૧॥

શ્વેતાશ્વતરમન્ત્રેણ સ્તુવન્તં ગિરિજાપતિમ્ ।
અનન્તાદિમહાનાગાન્કૈલાસગિરિસન્નિભાન્ ॥ ૪૨॥

કૈવલ્યોપનિષત્પાઠાન્મણિરત્નવિભૂષિતાન્ ।
સુવર્ણવેત્રહસ્તાઢ્યં નન્દિનં પુરતઃ સ્થિતમ્ ॥ ૪૩॥

દક્ષિણે મૂષકારૂઢં ગણેશં પર્વતોપમમ્ ।
મયૂરવાહનારૂઢમુત્તરે ષણ્મુખં તથા ॥ ૪૪॥

મહાકાલં ચ ચણ્ડેશં પાર્શ્વયોર્ભીષણાકૃતિમ્ ।
કાલાગ્નિરુદ્રં દૂરસ્થં જ્વલદ્દાવાગ્નિસન્નિભમ્ ॥ ૪૫॥

ત્રિપાદં કુટિલાકારં નટદ્ભૃઙ્ગિરિટિં પુરઃ ।
નાનાવિકારવદનાન્કોટિશઃ પ્રમથાધિપાન્ ॥ ૪૬॥

નાનાવાહનસંયુક્તં પરિતો માતૃમણ્ડલમ્ ।
પઞ્ચાક્ષરીજપાસક્તાન્સિદ્ધવિદ્યાધરાદિકાન્ ॥ ૪૭॥

દિવ્યરુદ્રકગીતાનિ ગાયત્કિન્નરવૃન્દકમ્ ।
તત્ર ત્રૈયમ્બકં મન્ત્રં જપદ્દ્વિજકદમ્બકમ્ ॥ ૪૮॥

ગાયન્તં વીણયા ગીતં નૃત્યન્તં નારદં દિવિ ।
નૃત્યતો નાટ્યનૃત્યેન રમ્ભાદીનપ્સરોગણાન્ ॥ ૪૯॥

ગાયચ્ચિત્રરથાદીનાં ગન્ધર્વાણાં કદમ્બકમ્ ।
કમ્બલાશ્વતરૌ શંભુકર્ણભૂષણતાં ગતૌ ॥ ૫૦॥

ગાયન્તૌ પન્નગૌ ગીતં કપાલં કમ્બલં તથા ।
એવં દેવસભાં દૃષ્ટ્વા કૃતાર્થો રઘુનન્દનઃ ॥ ૫૧॥

હર્ષગદ્ગદયા વાચા સ્તુવન્દેવં મહેશ્વરમ્ ।
દિવ્યનામસહસ્રેણ પ્રણનામ પુનઃ પુનઃ ॥ ૫૨॥

ઇતિ શ્રીપદ્મપુરાણે ઉપરિભાગે શિવગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શિવરાઘવસંવાદે
શિવપ્રાદુર્ભાવાખ્યશ્ચતુર્થોઽધ્યાયઃ ॥ ૪ ॥

---

અથ પઞ્ચમોઽધ્યાયઃ ॥

સૂત ઉવાચ ॥

અથ પ્રાદુરભૂત્તત્ર હિરણ્મયરથો મહાન્ ।
અનેકદિવ્યરત્નાંશુકિર્મીરિતદિગન્તરઃ ॥ ૧॥

નદ્યુપાન્તિકપઙ્કાઢ્યમહાચક્રચતુષ્ટયઃ ।
મુક્તાતોરણસંયુક્તઃ શ્વેતચ્છત્રશતાવૃતઃ ॥ ૨॥

શુદ્ધહેમખલીનાઢ્યતુરઙ્ગગણસંયુતઃ ।
શુક્તાવિતાનવિલસદૂર્ધ્વદિવ્યવૃષધ્વજઃ ॥ ૩॥

મત્તવારણિકાયુક્તઃ પટ્ટતલ્પોપશોભિતઃ ।
પારિજાતતરૂદ્ભૂતપુષ્પમાલાભિરઞ્ચિતઃ ॥ ૪॥

મૃગનાભિસમુદ્ભૂતકસ્તૂરિમદપઙ્કિલઃ ।
કર્પૂરાગધૂપોત્થગન્ધાકૃષ્ટમધુવ્રતઃ ॥ ૫॥

સંવર્તઘનઘોષાઢ્યો નાનાવાદ્યસમન્વિતઃ ।
વીણાવેણુસ્વનાસક્તકિન્નરીગણસંકુલઃ ॥ ૬॥

એવં દૃષ્ટ્વા રથશ્રેષ્ઠં વૃષાદુત્તીર્ય શંકરઃ ।
અમ્બયા સહિતસ્તત્ર પટ્ટતલ્પેઽવિશત્તદા ॥ ૭॥

નીરાજનૈઃ સુરસ્ત્રીણાં શ્વેતચામરચાલનૈઃ ।
દિવ્યવ્યજનપાતૈશ્ચ પ્રહૃષ્ટો નીલલોહિતઃ ॥ ૮॥

ક્વણત્કઙ્કણનિધ્વાનૈર્મંજુમઞ્જીરસિઞ્જિતૈઃ ।
વીણાવેણુસ્વનૈર્ગીતૈઃ પૂર્ણમાસીજ્જગત્ત્રયમ્ ॥ ૯॥

શુકકેકિકુલારાવૈઃ શ્વેતપારાવતસ્વનૈઃ ।
ઉન્નિદ્રભૂષાફણિનાં દર્શનાદેવ બર્હિણઃ ॥ ૧૦॥

નનૃતુર્દર્શયન્તઃ સર્વાંશ્ચન્દ્રકાન્કોટિસંખ્યયા ।
પ્રણમન્તં તતો રામમુત્થાપ્ય વૃષભધ્વજઃ ॥ ૧૧॥

આનિનાય રથં દિવ્યં પ્રહૃષ્ટેનાન્તરાત્મના ।
કમણ્ડલુજલૈઃ સ્વચ્છૈઃ સ્વયમાચમ્ય યત્નતઃ ॥ ૧૨॥

સમાચમ્યાથ પુરતઃ સ્વાંકે રામમુપાનયત્ ।
અથ દિવ્યં ધનુસ્તસ્મૈ દદૌ તૂણીરમક્ષયમ્ ॥ ૧૩॥

મહાપાશુપતં નામ દિવ્યમસ્ત્રં દદૌ તતઃ ।
ઉક્તશ્ચ તેન રામોઽપિ સાદરં ચન્દ્રમૌલિના ॥ ૧૪॥

જગન્નાશકરં રૌદ્રમુગ્રમસ્ત્રમિદં નૃપ ।

અતો નેદં પ્રયોક્તવ્યં સામાન્યસમરાદિકે ॥ ૧૫॥

અન્યન્નાસ્તિ પ્રતીઘાતમેતસ્ય ભુવનત્રયે ।
તસ્માત્પ્રાણત્યયે રામ પ્રયોક્તવ્યમુપસ્થિતે ॥ ૧૬॥

અન્યદૈત્યત્પ્રયુક્તં તુ જગત્સંક્ષયકૃદ્ભવેત્ ।
અથાહૂય સુરશ્રેષ્ઠાન્ લોકપાલાન્મહેશ્વરઃ ॥ ૧૭॥

ઉઅવાચ પરમપ્રીતઃ સ્વં સ્વમસ્ત્રં પ્રયચ્છત ।
રાઘવોઽયં ચ તૈરસ્ત્રૈ રાવણં નિહનિષ્યતિ ॥ ૧૮॥

તસ્મૈ દેવૈરવધ્યત્વમિતિ દત્તો વરો મયા ।
તસ્માદ્વાનરતામેત્ય ભવન્તો યુદ્ધદુર્મદાઃ ॥ ૧૯॥

સાહાય્યમસ્ય કુર્વન્તુ તેન સુસ્થા ભવિષ્યથ ।
તદાજ્ઞાં શિરસા ગૃહ્ય સુરાઃ પ્રાઞ્જલયસ્તથા ॥ ૨૦॥

પ્રણમ્ય ચરણૌ શંભોઃ સ્વં સ્વમસ્ત્રં દદુર્મુદા ।
નારાયણાસ્ત્રં દૈત્યારિરૈન્દ્રમસ્ત્રં પુરંદરઃ ॥ ૨૧॥

બ્રહ્માપિ બ્રહ્મદણ્ડાસ્ત્રમાગ્નેયાસ્ત્રં ધનંજયઃ ।
યામ્યં યમોઽપિ મોહાસ્ત્રં રક્ષોરાજસ્તથા દદૌ ॥ ૨૨॥

વરુણો વારુણં પ્રાદાદ્વાયવ્યાસ્ત્રં પ્રભઞ્જનઃ ।
કૌબેરં ચ કુબેરોઽપિ રૌદ્રમીશાન એવ ચ ॥ ૨૩॥

સૌરમસ્ત્રં દદૌ સૂર્યઃ સૌમ્યં સોમશ્ચ પાર્વતમ્ ।
વિશ્વેદેવા દદુસ્તસ્મૈ વસવો વાસવાભિધમ્ ॥ ૨૪॥

અથ તુષ્ટઃ પ્રણમ્યેશં રામો દશરથાત્મજઃ ।
પ્રાઞ્જલિઃ પ્રણતો ભૂત્વા ભક્તિયુક્તો વ્યજિજ્ઞપત્ ॥ ૨૫॥

શ્રીરામ ઉવાચ ॥

ભગવાન્માનુષેણૈવ નોલ્લઙ્ઘ્યો લવણામ્બુધિઃ ।
તત્ર લઙ્કાભિધં દુર્ગં દુર્જયં દેવદાનવૈઃ ॥ ૨૬॥

અનેકકોટયસ્તત્ર રાક્ષસા બલવત્તરાઃ ।
સર્વે સ્વાધ્યાયનિરતાઃ શિવભક્તા જિતેન્દ્રિયાઃ ॥ ૨૭॥

અનેકમાયાસંયુક્તા બુદ્ધિમન્તોઽગ્નિહોત્રિણઃ ।

કથમેકાકિના જેયા મયા ભ્રાત્રા ચ સંયુગે ॥ ૨૮॥

શ્રીમહાદેવ ઉવાચ ॥

રાવણસ્ય વધે રામ રક્ષસામપિ મારણે ।
વિચારો ન ત્વયા કાર્યસ્તસ્ય કાલોઽયમાગતઃ ॥ ૨૯॥

અધર્મે તુ પ્રવૃત્તાસ્તે દેવબ્રાહ્મણપીડને ।
તસ્માદાયુઃક્ષયં યાતં તેષાં શ્રીરપિ સુવ્રત ॥ ૩૦॥

રાજસ્ત્રીકામનાસક્તં રાવણં નિહનિષ્યસિ ।
પાપાસક્તો રિપુર્જેતુઃ સુકરઃ સમરાઙ્ગણે ॥ ૩૧॥

અધર્મે નિરતઃ શત્રુર્ભાગ્યેનૈવ હિ લભ્યતે ।
અધીતધર્મશાસ્ત્રોઽપિ સદા વેદરતોઽપિ વા ॥ ૩૨॥

વિનાશકાલે સમ્પ્રાપ્તે ધર્મમાર્ગાચ્ચ્યુતો ભવેત્ ।
પીડ્યન્તે દેવતાઃ સર્વાઃ સતતં યેન પાપિના ॥ ૩૩॥

બ્રાહ્મણા ઋષયશ્ચૈવ તસ્ય નાશઃ સ્વયં સ્થિતઃ ।
કિષ્કિંધાનગરે રામ દેવાનામંશસંભવાઃ ॥ ૩૪॥

વાનરા બહવો જાતા દુર્જયા બલવત્તરાઃ ।
સાહાય્યં તે કરિષ્યન્તિ તૈર્બધ્વા ચ પયોનિધિમ્ ॥ ૩૫॥

અનેકશૈલસંબદ્ધે સેતૌ યાન્તુ વલીમુખાઃ ।
રાવણં સગણં હત્વા તામાનય નિજાં પ્રિયામ્ ॥ ૩૬॥

શસ્ત્રૈર્યુદ્ધે જયો યત્ર તત્રાસ્ત્રાણિ ન યોજયેત્ ।
નિરસ્ત્રેષ્વલ્પશસ્ત્રેષુ પલાયનપરેષુ ચ ॥ ૩૭॥

અસ્ત્રાણિ મુઞ્ચન્ દિવ્યાનિ સ્વયમેવ વિનશ્યતિ ।
અથવા કિં બહૂક્તેન મયૈવોત્પાદિતં જગત્ ॥ ૩૮॥

મયૈવ પાલ્યતે નિત્યં મયા સંહ્રિયતેઽપિ ચ ।
અહમેકો જગન્મૃત્યુર્મૃત્યોરપિ મહીપતે ॥ ૩૯॥

ગ્રસેઽહમેવ સકલં જગદેતચ્ચરાચરમ્ ।
મમ વક્ત્રગતાઃ સર્વે રાક્ષસા યુદ્ધદુર્મદાઃ ॥ ૪૦॥

નિમિત્તમાત્રં ત્વં ભૂયાઃ કીર્તિમાપ્સ્યસિ સંગરે ॥ ૪૧॥

ઇતિ શ્રીપદ્મપુરાણે ઉપરિભાગે શિવગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શિવરાઘવસંવાદે
રામાય વરપ્રદાનં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૫ ॥

---

અથ ષષ્ઠોઽધ્યાયઃ ॥

શ્રીરામ ઉવાચ ॥

ભગવન્નત્ર મે ચિત્રં મહદેતત્પ્રજાયતે ।
શુદ્ધસ્ફટિકસંકાશસ્ત્રિનેત્રશ્ચન્દ્રશેખરઃ ॥ ૧॥

મૂર્તસ્ત્વં તુ પરિચ્છિન્નાકૃતિઃ પુરુષરૂપધૃક્ ।
અમ્બયા સહિતોઽત્રૈવ રમસે પ્રમથૈઃ સહ ॥ ૨॥

ત્વં કથં પઞ્ચભૂતાદિ જગદેતચ્ચરાચરમ્ ।
તદ્બ્રૂહિ ગિરિજાકાન્ત મયિ તેઽનુગ્રહો યદિ ॥ ૩॥

શ્રીભગવાનુવાચ ॥

સાધુ પૃષ્ટં મહાભાગ દુર્જ્ઞેયમમરૈરપિ।
તત્પ્રવક્ષ્યામિ તે ભક્ત્યા બ્રહ્મચર્યેણ સુવ્રત ॥ ૪॥

પારં યાસ્યસ્યનાયાસાદ્યેન સંસારનીરધેઃ ।
દૃશ્યન્તે પઞ્ચભૂતાનિ યે ચ લોકાશ્ચતુર્દશ ॥ ૫॥

સમુદ્રાઃ સરિતો દેવા રાક્ષસા ઋષયસ્તથા ।
દૃશ્યન્તે યાનિ ચાન્યાનિ સ્થાવરાણિ ચરાણિ ચ ॥ ૬॥

ગન્ધર્વાઃ પ્રમથા નાગાઃ સર્વે તે મદ્વિભૂતયઃ ।
પુરા બ્રહ્માદયો દેવા દ્રષ્ટુકામા મમાકૃતિમ્ ॥ ૭॥

મંદરં પ્રયયુઃ સર્વે મમ પ્રિયતરં ગિરિમ્ ।
સ્તુત્વા પ્રાઞ્જલયો દેવા માં તદા પુરતઃ સ્થિતાઃ ॥ ૮॥

તાન્દૃષ્ટ્વાથ મયા દેવાન્ લીલાકુલિતચેતસઃ ।
તેષામપહૃતં જ્ઞાનં બ્રહ્માદીનાં દિવૌકસામ્ ॥ ૯॥

અથ તેઽપહૃતજ્ઞાના મામાહુઃ કો ભવાનિતિ ।
અથાબ્રુવમહં દેવાનહમેવ પુરાતનઃ ॥ ૧૦॥

આસં પ્રથમમેવાહં વર્તામિ ચ સુરેશ્વરાઃ ।
ભવિષ્યામિ ચ લોકેઽસ્મિન્મત્તો નાન્યસ્તિ કશ્ચન ॥ ૧૧॥

વ્યતિરિક્તં ચ મત્તોઽસ્તિ નાન્યત્કિઞ્ચિત્સુરેશ્વરાઃ ।
નિત્યોઽનિત્યોઽહમનઘો બ્રહ્મણાં બ્રહ્મણસ્પતિઃ ॥ ૧૨॥

દક્ષિણાઞ્ચ ઉદઞ્ચોઽહં પ્રાઞ્ચઃ પ્રત્યઞ્ચ એવ ચ ।
અધશ્ચોર્ધ્વં ચ વિદિશો દિશશ્ચાહં સુરેશ્વરાઃ ॥ ૧૩॥

સાવિત્રી ચાપિ ગાયત્રી સ્ત્રી પુમાનપુમાનપિ ।
ત્રિષ્ટુબ્જગત્યનુષ્ટુપ્ ચ પંક્તિશ્છન્દસ્ત્રયીમયઃ ॥ ૧૪॥

સત્યોઽહં સર્વગઃ શાન્તસ્ત્રેતાગ્નિર્ગૌર્યહં ગુરુઃ ।
ગૌર્યહં ગહ્વરં ચાહં દ્યૌરહં જગતાં વિભુઃ ॥ ૧૫॥

જ્યેષ્ઠઃ સર્વસુરશ્રેષ્ઠો વરિષ્ઠોઽહમપાંપતિઃ ।
આર્યોઽહં ભગવાનીશસ્તેજોઽહં ચાદિરપ્યહમ્ ॥ ૧૬॥

ઋગ્વેદોઽહં યજુર્વેદઃ સામવેદોઽહમાત્મભૂઃ ।
અથર્વણશ્ચ મન્ત્રોઽહં તથા ચાઙ્ગિરસો વરઃ ॥ ૧૭॥

ઇતિહાસપુરાણાનિ કલ્પોઽહં કલ્પવાનહમ્ ।
નારાશંસી ચ ગાથાહં વિદ્યોપનિષદોઽસ્મ્યહમ્ ॥ ૧૮॥

શ્લોકાઃ સૂત્રાણિ ચૈવાહમનુવ્યાખ્યાનમેવ ચ ।
વ્યાખ્યાનાનિ પરા વિદ્યા ઇષ્ટં હુતમથાહુતિઃ ॥ ૧૯॥

દત્તાદત્તમયં લોકઃ પરલોકઽહમક્ષરઃ ।
ક્ષરઃ સર્વાણિ ભૂતાનિ દાન્તિઃ શાન્તિરહં ખગઃ ॥ ૨૦॥

ગુહ્યોઽહં સર્વવેદેષુ આરણ્યોહમજોઽપ્યહમ્ ।
પુષ્કરં ચ પવિત્રં ચ મધ્યં ચાહમતઃ પરમ્ ॥ ૨૧॥

બહિશ્ચાહં તથા ચાન્તઃ પુરસ્તાદહમવ્યયઃ ।
જ્યોતિશ્ચાહં તમશ્ચાહં તન્માત્રાણીન્દ્રિયાણ્યહમ્ ॥ ૨૨॥

બુદ્ધિશ્ચાહમહંકારો વિષયાણ્યહમેવ હિ ।
બ્રહ્મા વિષ્ણુર્મહેશોહમુમા સ્કન્દો વિનાયકઃ ॥ ૨૩॥

ઇન્દ્રોઽગ્નિશ્ચ યમશ્ચાહં નિરૃતિર્વરુણોઽનિલઃ ।
કુબેરોઽહં તથેશાનો ભૂર્ભુવઃ સ્વર્મહર્જનઃ ॥ ૨૪॥

તપઃ સત્યં ચ પૃથિવી ચાપસ્તેજોઽનિલોઽપ્યહમ્ ।
આકાશોઽહં રવિઃ સોમો નક્ષત્રાણિ ગ્રહાસ્તથા ॥ ૨૫॥

પ્રાણઃ કાલસ્તથા મૃત્યુરમૃતં ભૂતમપ્યહમ્ ।
ભવ્યં ભવિષ્યત્કૃત્સ્નં ચ વિશ્વં સર્વાત્મકોઽપ્યહમ્ ॥ ૨૬॥

ઓમાદૌ ચ તથા મધ્યે ભૂર્ભુવઃ સ્વસ્તથૈવ ચ ।
તતોઽહં વિશ્વરૂપોઽસ્મિ શીર્ષં ચ જપતાં સદા ॥ ૨૭॥

અશિતં પાયિતં ચાહં કૃતં ચાકૃતમપ્યહમ્ ।
પરં ચૈવાપરં ચાહમહં સર્વપરાયણઃ ॥ ૨૮॥

અહં જગદ્ધિતં દિવ્યમક્ષરં સૂક્ષ્મમવ્યયમ્ ।
પ્રાજાપત્યં પવિત્રં ચ સૌમ્યમગ્રાહ્યમગ્રિયમ્ ॥ ૨૯॥

અહમેવોપસંહર્તા મહાગ્રાસૌજસાં નિધિઃ ।
હૃદિ યો દેવતાત્વેન પ્રાણત્વેન પ્રતિષ્ઠિતઃ ॥ ૩૦॥

શિરશ્ચોત્તરતો યસ્ય પાદૌ દક્ષિણતસ્તથા ।
યશ્ચ સર્વોત્તરઃ સાક્ષાદોઙ્કારોઽહં ત્રિમાત્રકઃ ॥ ૩૧॥

ઊર્ધ્વં ચોન્નામહે યસ્માદધશ્ચાપનયામ્યહમ્ ।
તસ્માદોઙ્કાર એવાહમેકો નિત્યઃ સનાતનઃ ॥ ૩૨॥

ઋચો યજૂંષિ સામાનિ યો બ્રહ્મા યજ્ઞકર્મણિ ।
પ્રણામહે બ્રાહ્મણેભ્યસ્તેનાહં પ્રણવો મતઃ ॥ ૩૩॥

સ્નેહો યથા માંસપિણ્ડં વ્યાપ્નોતિ વ્યાપ્યયત્યપિ ।
સર્વાન્ લોકાનહં તદ્વત્સર્વવ્યાપી તતોઽસ્મ્યહમ્ ॥ ૩૪॥

બ્રહ્મા હરિશ્ચ ભગવાનાદ્યન્તં નોપલબ્ધવાન્ ।
તતોઽન્યે ચ સુરા યસ્માદનન્તોઽહમિતીરિતઃ ॥ ૩૫॥

ગર્ભજન્મજરામૃત્યુસંસારભવસાગરાત્ ।
તારયામિ યતો ભક્તં તસ્માત્તારોઽહમીરિતઃ ॥ ૩૬॥

ચતુર્વિધેષુ દેહેષુ જીવત્વેન વસામ્યહમ્ ।
સૂક્ષ્મો ભૂત્વા ચ હૃદ્દેશે યત્તત્સૂક્ષ્મં પ્રકીર્તિતઃ ॥ ૩૭॥

મહાતમસિ મગ્નેભ્યો ભક્તેભ્યો યત્પ્રકાશયે ।

વિદ્યુદ્વદતુલં રૂપં તસ્માદ્વિદ્યુતમસ્મ્યહમ્ ॥ ૩૮॥

એક એવ યતો લોકાન્ વિસૃજામિ સૃજામિ ચ ।
વિવાસયામિ ગૃહ્ણામિ તસ્માદેકોઽહમીશ્વરઃ ॥ ૩૯॥

ન દ્વિતીયો યતસ્તસ્થે તુરીયં બ્રહ્મ યત્સ્વયમ્ ।
ભૂતાન્યાત્મનિ સંહૃત્ય ચૈકો રુદ્રો વસામ્યહમ્ ॥ ૪૦॥

સર્વાંલ્લોકાન્યદીશેહમીશિનીભિશ્ચ શક્તિભિઃ ।
ઈશાનમસ્ય જગતઃ સ્વર્દૃશં ચક્ષુરીશ્વરમ્ ॥ ૪૧॥

ઈશાનશ્ચાસ્મિ જગતાં સર્વેષામપિ સર્વદા ।
ઈશાનઃ સર્વવિદ્યાનાં યદીશાનસ્તતોઽસ્મ્યહમ્ ॥ ૪૨॥

સર્વભાવાન્નિરીક્ષેઽહમાત્મજ્ઞાનં નિરીક્ષયે ।
યોગં ચ ગમયે તસ્માદ્ભગવાન્મહતો મતઃ ॥ ૪૩॥

અજસ્રં યચ્ચ ગૃહ્ણામિ વિસૃજામિ સૃજામિ ચ ।
સર્વાંલ્લોકાન્વાસયામિ તેનાહં વૈ મહેશ્વરઃ ॥ ૪૪॥

મહત્યાત્મજ્ઞાનયોગૈશ્વર્યે યસ્તુ મહીયતે ।
સર્વાન્ ભાવાન્ પરિત્યજ્ય મહાદેવશ્ચ સોઽસ્મ્યહમ્ ॥ ૪૫॥

એષોઽસ્મિ દેવઃ પ્રદિશો નુ સર્વાઃ
    પૂર્વો હિ જાતોસ્મ્યહમેવ ગર્ભે ।
અહં હિ જાતશ્ચ જનિષ્યમાણઃ
    પ્રત્યગ્જનસ્તિષ્ઠતિ સર્વતોમુખઃ ॥ ૪૬॥

વિશ્વતશ્ચક્ષુરુત વિશ્વતોમુખો
    વિશ્વતોબાહુરુત વિશ્વતસ્પાત્ ।
સંવાહુભ્યાં ધમતિ સમ્પતત્રૈ-
    ર્દ્યાવાભૂમી જનયન્દેવ એકઃ ॥ ૪૭॥

વાલાગ્રમાત્રં હૃદયસ્ય મધ્યે
    વિશ્વં દેવં જાતવેદં વરેણ્યમ્ ।
મામાત્મસ્થં યેઽનુપશ્યન્તિ ધીરા-
    સ્તેષાં શાન્તિઃ શાશ્વતી નેતરેષામ્ ॥ ૪૮॥

અહં યોનિમધિતિષ્ઠામિ ચૈકો

મયેદં પૂર્ણં પઞ્ચવિધં ચ સર્વમ્ ।
મામીશાનં પુરુષં દેવમીડ્યં વિદિત્વા
નિચાય્યેમાં શાન્તિમત્યન્તમેતિ ॥ ૪૯॥

પ્રાણેષ્વન્તર્મનસો લિઙ્ગમાહુ-
રસ્મિન્ક્રોધોઉઆ ચ તૃષ્ણા ક્ષમા ચ ।
તૃષ્ણાં હિત્વા હેતુજાલસ્ય મૂલં
બુદ્ધ્યા ચિત્તં સ્થાપયિત્વા મયીહ ।
એવં યે માં ધ્યાયમાના ભજંતે
તેષાં શાન્તિઃ શાશ્વતી નેતરેષામ્ ॥ ૫૦॥

યતો વાચો નિવર્તન્તે અપ્રાપ્ય મનસા સહ ।
આનન્દં બ્રહ્મ માં જ્ઞાત્વા ન બિભેતિ કુતશ્ચન ॥ ૫૧॥

શ્રુત્વેતિ દેવા મદ્વાક્યં કૈવલ્યજ્ઞાનમુત્તમમ્ ।
જપન્તો મમ નામાનિ મમ ધ્યાનપરાયણાઃ ॥ ૫૨॥

સર્વે તે સ્વસ્વદેહાન્તે મત્સાયુજ્યં ગતાઃ પુરા ।
તતોઽગ્રે પરિદૃશ્યન્તે પદાર્થા મદ્વિભૂતયઃ ॥ ૫૩॥

મય્યેવ સકલં જાતં મયિ સર્વં પ્રતિષ્ઠિતમ્ ।
મયિ સર્વં લયં યાતિ તદ્બ્રહ્માદ્વયમસ્મ્યહમ્ ॥ ૫૪॥

અણોરણીયાનહમેવ તદ્વ-
ન્મહાનહં વિશ્વમહં વિશુદ્ધઃ ।
પુરાતનોઽહં પુરુષોઽહમીશો
હિરણ્મયોઽહં શિવરૂપમસ્મિ ॥ ૫૫॥

અપાણિપાદોઽહમચિન્ત્યશક્તિઃ
પશ્યામ્યચક્ષુઃ સ શ્ૃણોમ્યકર્ણઃ ।
અહં વિજાનામિ વિવિક્તરૂપો
ન ચાસ્તિ વેત્તા મમ ચિત્સદાહમ્ ॥ ૫૬॥

વેદૈરશેષૈરહમેવ વેદ્યો
વેદાન્તકૃદ્વેદવિદેવ ચાહમ્ ।
ન પુણ્યપાપે મમ નાસ્તિ નાશો
ન જન્મ દેહેન્દ્રિયબુદ્ધિરસ્તિ ॥ ૫૭॥

ન ભૂમિરાપો ન ચ વહ્નિરસ્તિ
    ન ચાનિલો મેઽસ્તિ ન મે નભશ્ચ ।
એવં વિદિત્વા એવં માં તત્ત્વતો વેત્તિ યસ્તુ રામ મહામ્તે
પરમાત્મરૂપં
    ગુહાશયં નિષ્કલમદ્વિતીયમ્ ॥ ૫૮ ॥

સમસ્તસાક્ષિં સદસદ્વિહીનઃ
    પ્રયાતિ શુદ્ધં પર્માત્મરૂપમ્ ॥ ૫૯ ॥

એવં માં તત્ત્વતો વેત્તિ યસ્તુ રામ મહામતે ।
સ એવ નાન્ય લોકેષુ કૈવલ્યફલમશ્નુતે ॥ ૬૦ ॥

ઇતિ શ્રીપદ્મપુરાણે ઉપરિભાગે શિવગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શિવરાઘવસંવાદે
વિભૂતિયોગો નામ ષષ્ઠોઽધ્યાયઃ ॥ ૬ ॥

---

અથ સપ્તમોઽધ્યાયઃ ॥

શ્રીરામ ઉવાચ ॥

ભગવન્યન્મયા પૃષ્ટં તત્તથૈવ સ્થિતં વિભો ।
અત્રોત્તરં મયા લબ્ધં ત્વત્તો નૈવ મહેશ્વર ॥ ૧ ॥

પરિચ્છિન્નપરીમાણે દેહે ભગવતસ્તવ ।
ઉત્પત્તિઃ પઞ્ચભૂતાનાં સ્થિતિર્વા વિલયઃ કથમ્ ॥ ૨ ॥

સ્વસ્વાધિકારસંબદ્ધાઃ કથં નામ સ્થિતાઃ સુરાઃ ।
તે સર્વે કથં દેવ ભુવનાનિ ચતુર્દશ ॥ ૩ ॥

ત્વત્તઃ શ્રુત્વાપિ દેવાત્ર સંશયો મે મહાનભૂત્ ।
અપ્રત્યાયિતચિત્તસ્ય સંશયં છેત્તુમર્હસિ ॥ ૪ ॥

શ્રીભગવાનુવાચ ॥

વટબીજેઽતિસૂક્ષ્મેઽપિ મહાવટતરુર્યથા ।
સર્વદાસ્તેઽન્યથા વૃક્ષઃ કુત આયાતિ તદ્વદ ॥ ૫ ॥

તદ્વન્મમ તનૌ રામ ભૂતાનામાગતિર્લયઃ ।
મહાસૈન્ધવપિણ્ડોઽપિ જલે ક્ષિપ્તો વિલીયતે ॥ ૬ ॥

ન દૃશ્યતે પુનઃ પાકાત્કુત આયાતિ પૂર્વવત્ ।
પ્રાતઃપ્રાતર્યથાઽઽલોકો જાયતે સૂર્યમણ્ડલાત્ ॥ ૭॥

એવં મત્તો જગત્સર્વં જાયતેઽસ્તિ વિલીયતે ।
મય્યેવ સકલં રામ તદ્વજ્જાનીહિ સુવ્રત ॥ ૮॥

શ્રીરામ ઉવાચ ॥

કથિતેઽપિ મહાભાગ દિગ્જડસ્ય યથા દિશિ ।
નિવર્તતે ભ્રમો નૈવ તદ્વન્મમ કરોમિ કિમ્ ॥ ૯॥

શ્રીભગવાનુવાચ ॥

મયિ સર્વં યથા રામ જગદેતચ્ચરાચરમ્ ।
વર્તતે તદ્દર્શયામિ ન દ્રષ્ટું ક્ષમતે ભવાન્ ॥ ૧૦॥

દિવ્યં ચક્ષુઃ પ્રદાસ્યામિ તુભ્યં દશરથાત્મજ ।
તેન પશ્ય ભયં ત્યક્ત્વા મત્તેજોમણ્ડલં ધ્રુવમ્ ॥ ૧૧॥

ન ચર્મચક્ષુષા દ્રષ્ટું શક્યતે મામકં મહઃ ।
નરેણ વા સુરેણાપિ તન્મમાનુગ્રહં વિના ॥ ૧૨॥

સૂત ઉવાચ ॥

ઇત્યુક્ત્વા પ્રદદૌ તસ્મૈ દિવ્યં ચક્ષુર્મહેશ્વરઃ ।
અથાદર્શયદેતસ્મૈ વક્ત્રં પાતાલસંનિભમ્ ॥ ૧૩॥

વિદ્યુત્કોટિપ્રભં દીપ્તમતિભીમં ભયાવહમ્ ।
તદ્દૃષ્ટ્વૈવ ભયાદ્રામો જાનુભ્યામવનિં ગતઃ ॥ ૧૪॥

પ્રણમ્ય દણ્ડવદ્ભૂમૌ તુષ્ટાવ ચ પુનઃ પુનઃ ।
અથોત્થાય મહાવીરો યાવદેવ પ્રપશ્યતિ ॥ ૧૫॥

વક્ત્રં પુરભિદસ્તત્ર અન્તર્બ્રહ્માણ્ડકોટયઃ ।
ચટકા ઇવ લક્ષ્યન્તે જ્વાલામાલાસમાકુલાઃ ॥ ૧૬॥

મેરુમન્દરવિન્ધ્યાદ્યા ગિરયઃ સપ્તસાગરાઃ ।
દૃશ્યન્તે ચન્દ્રસૂર્યાદ્યાઃ પઞ્ચ ભૂતાનિ તે સુરાઃ ॥ ૧૭॥

અરણ્યાનિ મહાનાગા ભુવનાનિ ચતુર્દશ ।
પ્રતિબ્રહ્માણ્ડમેવં તદ્દૃષ્ટ્વા દશરથાત્મજઃ ॥ ૧૮॥

સુરાસુરાણાં સંગ્રામસ્તત્ર પૂર્વાપરાનપિ ।
વિષ્ણોર્દશાવતારાંશ્ચ તત્તત્કર્માણ્યપિ દ્વિજાઃ ॥ ૧૯॥

પરાભવાંશ્ચ દેવાનાં પુરદાહં મહેશિતુઃ ।
ઉત્પદ્યમાનાનુત્પન્નાન્સર્વાનપિ વિનશ્યતઃ ॥ ૨૦॥

દૃષ્ટ્વા રામો ભયાવિષ્ટઃ પ્રણનામ પુનઃ પુનઃ ।
ઉત્પન્નતત્ત્વજ્ઞાનોઽપિ બભૂવ રઘુનન્દનઃ ॥ ૨૧॥

અથોપનિષદાં સારૈરર્થૈસ્તુષ્ટાવ શંકરમ્ ॥ ૨૨॥

શ્રીરામ ઉવાચ ॥

દેવ પ્રપન્નાર્તિહર પ્રસીદ
    પ્રસીદ વિશ્વેશ્વર વિશ્વવન્દ્ય ।
પ્રસીદ ગઙ્ગાધર ચન્દ્રમૌલે
    માં ત્રાહિ સંસારભયાદનાથમ્ ॥ ૨૩॥

ત્વત્તો હિ જાતં જગદેતદીશ
    ત્વય્યેવ ભૂતાનિ વસન્તિ નિત્યમ્ ।
ત્વય્યેવ શંભો વિલયં પ્રયાન્તિ
    ભૂમૌ યથા વૃક્ષલતાદયોઽપિ ॥ ૨૪॥

બ્રહ્મેન્દ્ર રુદ્રાશ્ચ મરુદ્ગણાશ્ચ
    ગન્ધર્વયક્ષાઽસુરસિદ્ધસઙ્ઘાઃ ।
ગઙ્ગાદિ નદ્યો વરુણાલયાશ્ચ
    વસન્તિ શૂલિંસ્તવ વક્ત્રયંત્રે ॥ ૨૫॥

ત્વન્માયયા કલ્પિતમિન્દુમૌલે
    ત્વય્યેવ દૃશ્યત્વમુપૈતિ વિશ્વમ્ ।
ભ્રાન્ત્યા જનઃ પશ્યતિ સર્વમેત-
    ચ્છુક્તૌ યથા રૌપ્યમહિં ચ રજ્જૌ ॥ ૨૬॥

તેજોભિરાપૂર્ય જગત્સમસ્તં
    પ્રકાશમાનઃ કુરુષે પ્રકાશમ્ ।
વિના પ્રકાશં તવ દેવદેવ
    ન દૃશ્યતે વિશ્વમિદં ક્ષણેન ॥ ૨૭॥

અલ્પાશ્રયો નૈવ બૃહન્તમર્થં

ધત્તેઽણુરેકો ન હિ વિન્ધ્યશૈલમ્ ।
ત્વદ્વક્ત્રમાત્રે જગદેતદસ્તિ
ત્વન્માયયૈવેતિ વિનિશ્ચિનોમિ ॥ ૨૮॥

રજ્જૌ ભુજઙ્ગો ભયદો યથૈવ
ન જાયતે નાસ્તિ ન ચૈતિ નાશમ્ ।
ત્વન્માયયા કેવલમાત્રરૂપં
તથૈવ વિશ્વં ત્વયિ નીલકણ્ઠ ॥ ૨૯॥

વિચાર્યમાણે તવ યચ્છરીર-
માધારભાવં જગતામુપૈતિ ।
તદપ્યયશ્યં મદવિદ્યયૈવ
પૂર્ણશ્ચિદાનદમયો યતસ્ત્વમ્ ॥ ૩૦॥

પૂજેષ્ટપૂર્તાદિવરક્રિયાણાં
ભોક્તુઃ ફલં યચ્છસિ વિશ્વમેવ ।
મૃષૈતદેવં વચનં પુરારે
ત્વત્તોઽસ્તિ ભિન્નં ન ચ કિઞ્ચિદેવ ॥ ૩૧॥

અજ્ઞાનમૂઢા મુનયો વદન્તિ
પૂજોપચારાદિબહિઃક્રિયાભિઃ ।
તોષં ગિરીશો ભજતીતિ મિથ્યા
કુતસ્ત્વમૂર્તસ્ય તુ ભોગલિપ્સા ॥ ૩૨॥

કિઞ્ચિદ્દલં વા ચુલકોદકં વા
યસ્ત્વં મહેશ પ્રતિગૃહ્ય દત્સે ।
ત્રૈલોક્યલક્ષ્મીમપિ યજ્જનેભ્યઃ
સર્વં ત્વવિદ્યાકૃતમેવ મન્યે ॥ ૩૩॥

વ્યાપ્નોષિ સર્વા વિદિશો દિશશ્ચ
ત્વં વિશ્વમેકઃ પુરુષઃ પુરાણઃ ।
નષ્ટેઽપિ તસ્મિંસ્તવ નાસ્તિ હાનિ-
ર્ઘટે વિનષ્ટે નભસો યથૈવ ॥ ૩૪॥

યથૈકમાકાશગમર્કબિમ્બં
ક્ષુદ્રેષુ પાત્રેષુ જલાન્વિતેષુ ।
ભજત્યનેકપ્રતિબિમ્બભાવં

તથા ત્વમન્તઃકરણેષુ દેવ ॥ ૩૫॥

સંસર્જને વાઽપ્યવને વિનાશે
વિશ્વસ્ય કિઞ્ચિત્તવ નાસ્તિ કાર્યમ્ ।
અનાદિભિઃ પ્રાણભૃતામદૃષ્ટૈ-
સ્તથાપિ તત્સ્વપ્નવદાતનોષિ ॥ ૩૬॥

સ્થૂલસ્ય સૂક્ષ્મસ્ય જડસ્ય ભોગો
દેહસ્ય શંભો ન ચિદં વિનાસ્તિ ।
અતસ્ત્વદારોપણમાતનોતિ
શ્રુતિઃ પુરારે સુખદુઃખયોઃ સદા ॥ ૩૭॥

નમઃ સચ્ચિદામ્ભોધિહંસાય તુભ્યં
નમઃ કાલકાલાય કાલાત્મકાય ।
નમસ્તે સમસ્તાઘસંહારકર્ત્રે
નમસ્તે મૃષાચિત્તવૃત્ત્યૈકભોક્ત્રે ॥ ૩૮॥

સૂત ઉવાચ ॥

એવં પ્રણમ્ય વિશ્વેશં પુરતઃ પ્રાઞ્જલિઃ સ્થિતઃ ।
વિસ્મિતઃ પરમેશાનં જગાદ રઘુનન્દનઃ ॥ ૩૯॥

શ્રીરામ ઉવાચ ॥

ઉપસંહર વિશ્વાત્મન્વિશ્વરૂપમિદં તવ ।
પ્રતીતં જગદૈકાત્મ્યં શંભો ભવદનુગ્રહાત્ ॥ ૪૦॥

શ્રીભગવાનુવાચ ॥

પશ્ય રામ મહાબાહો મત્તો નાન્યોઽસ્તિ કશ્ચન ॥ ૪૧॥

સૂત ઉવાચ ॥

ઉત્યુક્ત્વૈવોપસંજહ્રે સ્વદેહે દેવતાદિકાન્ ।
મીલિતાક્ષઃ પુનર્હર્ષાદ્યાવદ્રામઃ પ્રપશ્યતિ ॥ ૪૨॥

તાવદેવ ગિરેઃ શૃઙ્ગે વ્યાઘ્રચર્મોપરિ સ્થિતમ્ ।
દદર્શ પઞ્ચવદનં નીલકણ્ઠં ત્રિલોચનમ્ ॥ ૪૩॥

વ્યાઘ્રચર્મામ્બરધરં ભૂતિભૂષિતવિગ્રહમ્ ।
ફણિકઙ્કણભૂષાઢ્યં નાગયજ્ઞોપવીતિનમ્ ॥ ૪૪॥

વ્યાઘ્રચર્મોત્તરીયં ચ વિદ્યુત્પિઙ્ગજટાધરમ્ ।
એકાકિનં ચન્દ્રમૌલિં વરેણ્યમભયપ્રદમ્ ॥ ૪૫॥

ચતુર્ભુજં ખણ્ડપરશું મૃગહસ્તં જગત્પતિમ્ ।
અથાજ્ઞાયા પુરસ્તસ્ય પ્રણમ્યોપવિવેશ સઃ ॥ ૪૬॥

અથાહ રામં દેવેશો યદ્યત્પ્રષ્ટુમભીચ્છસિ ।
તત્સર્વં પૃચ્છ રામ ત્વં મત્તો નાન્યોઽસ્તિ તે ગુરુઃ ॥ ૪૭॥

ઇતિ શ્રીપદ્મપુરાણે ઉપરિભાગે શિવગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શિવરાઘવસંવાદે
વિશ્વરૂપદર્શનં નામ સપ્તમોઽધ્યાયઃ ॥ ૭ ॥

---

અથ અષ્ટમોઽધ્યાયઃ ॥

શ્રીરામ ઉવાચ ॥

પાઞ્ચભૌતિકદેહસ્ય ચોત્પત્તિર્વિલયઃ સ્થિતિઃ ।
સ્વરૂપં ચ કથં દેવ ભગવન્વક્તુમર્હસિ ॥ ૧॥

શ્રીરામ ઉવાચ ॥

પાઞ્ચભૌતિકદેહસ્ય ચોત્પત્તિર્વિલયઃ સ્થિતિઃ ।
સ્વરૂપં ચ કથં દેવ ભગવન્વક્તુમર્હસિ ॥ ૧॥

શ્રીભગવાનુવાચ ॥

પઞ્ચભૂતૈઃ સમારબ્ધો દેહોઽયં પાઞ્ચભૌતિકઃ ।
તત્ર પ્રદાનં પૃથિવી શેષાણાં સહકારિતા ॥ ૨॥

જરાયુજોઽણ્ડજશ્ચૈવ સ્વેદજશ્ચોદ્ભિજસ્તથા ।
એવં ચતુર્વિધઃ પ્રોક્તો દેહોઽયં પાઞ્ચભૌતિકઃ ॥ ૩॥

માનસસ્તુ પરઃ પ્રોક્તો દેવાનામેવ સંસ્મૃતઃ ।
તત્ર વક્ષ્યે પ્રથમતઃ પ્રધાનત્વાજ્જરાયુજમ્ ॥ ૪॥

શુક્રશોણિતસંભૂતા વૃત્તિરેવ જરાયુજઃ ।
સ્ત્રીણાં ગર્ભાશયે શુક્રમૃતુકાલે વિશેદ્યદા ॥ ૫॥

યોષિતો રજસા યુક્તં તદેવ સ્યાજ્જરાયુજમ્ ।
બાહુલ્યાદ્રજસા સ્ત્રી સ્યાચ્છુક્રાધિક્યે પુમાન્ભવેત્ ॥ ૬॥

શુક્રશોણિતયોઃ સામ્યે જાયતે ચ નપુંસકઃ ।
ઋતુસ્નાતા ભવેન્નારી ચતુર્થે દિવસે તતઃ ॥ ૭॥

ઋતુકાલસ્તુ નિર્દિષ્ટ આષોડશદિનાવધિ ।
તત્રાયુગ્મદિને સ્ત્રી સ્યાત્પુમાન્યુગ્મદિને ભવેત્ ॥ ૮॥

ષોડશે દિવસે ગર્ભો જાયતે યદિ સુભ્રુવઃ ।
ચક્રવર્તી ભવેદ્રાજા જાયતે નાત્ર સંશયઃ ॥ ૯॥

ઋતુસ્નાતા યસ્ય પુંસઃ સાકાઙ્ક્ષં મુખમીક્ષતે ।
તદાકૃતિર્ભવેદ્ગર્ભસ્તત્પશ્યેત્સ્વામિનો મુખમ્ ॥ ૧૦॥

યાઽસ્તિ ચર્માવૃતિઃ સૂક્ષ્મા જરાયુઃ સા નિગદ્યતે ।
શુક્રશોણિતયોર્યોગસ્તસ્મિન્નેવ ભવેદ્યતઃ ।
તત્ર ગર્ભો ભવેદ્યસ્માત્તેન પ્રોક્તો જરાયુજઃ ॥ ૧૧॥

અણ્ડજાઃ પક્ષિસર્પાદ્યાઃ સ્વેદજા મશકાદયઃ ।
ઉદ્ભિજ્જાસ્તૃણગુલ્માદ્યા માનસાશ્ચ સુરર્ષયઃ ॥ ૧૨॥

જન્મકર્મવશાદેવ નિષિક્તં સ્મરમન્દિરે ।
શુક્રં રજઃસમાયુક્તં પ્રથમે માસિ તદ્દ્રવમ્ ॥ ૧૩॥

બુદ્બુદં કલલં તસ્માત્તતઃ પેશી ભવેદિદમ્ ।
પેશીઘનં દ્વિતીયે તુ માસિ પિણ્ડઃ પ્રજાયતે ।૧૪॥

કરાઙ્ઘ્રિશીર્ષકાદીનિ તૃતીયે સંભવન્તિ હિ ।
અભિવ્યક્તિશ્ચ જીવસ્ય ચતુર્થે માસિ જાયતે ॥ ૧૫॥

તતશ્ચલતિ ગર્ભોઽપિ જનન્યા જઠરે સ્વતઃ ।
પુત્રશ્ચેદ્દક્ષિણે પાર્શ્વે કન્યા વામે ચ તિષ્ઠતિ ॥ ૧૬॥

નપુંસકસ્તૂદરસ્ય ભાગે તિષ્ઠતિ મધ્યતઃ ।
અતો દક્ષિણપાર્શ્વે તુ શેતે માતા પુમાન્યદિ ॥ ૧૭॥

અઙ્ગપ્રત્યઙ્ગભાગાશ્ચ સૂક્ષ્માઃ સ્યુર્યુગપત્તદા ।
વિહાય શ્મશ્રુદન્તાદીઞ્જન્માનન્તરસંભવાન્ ॥ ૧૮॥

ચતુર્થે વ્યક્તતા તેષાં ભાવાનામપિ જાયતે ।

પુંસાં સ્થૈર્યાદયો ભાવા ભીરુત્વાદ્યાસ્તુ યોષિતામ્ ॥ ૧૯॥

નપુંસકે ચ તે મિશ્રા ભવન્તિ રઘુનન્દન ।
માતૃજં ચાસ્ય હૃદયં વિષયાનભિકાઙ્ક્ષતિ ॥ ૨૦॥

તતો માતુર્મનોઽભીષ્ટં કુર્યાદ્ગર્ભવિવૃદ્ધયે ।
તાં ચ દ્વિહૃદયાં નારીમાહુર્દૌહૃદિનીં તતઃ ॥ ૨૧॥

અદાનાદ્દૌહૃદાનાં સ્યુર્ગર્ભસ્ય વ્યઙ્ગતાદયઃ ।
માતુર્યદ્વિષયે લોભસ્તદાર્તો જાયતે સુતઃ ॥ ૨૨॥

પ્રબુદ્ધં પઞ્ચમે ચિત્તં માંસશોણિતપુષ્ટતા ।
ષષ્ઠેઽસ્થિસ્નાયુનખરકેશલોમવિવિક્તતા ॥ ૨૩॥

બલવર્ણૌ ચોપચિતૌ સપ્તમે ત્વઙ્ગપૂર્ણતા ।
પાદાન્તરિતહસ્તાભ્યાં શ્રોત્રરન્ધ્રે પિધાય સઃ ॥ ૨૪॥

ઉદ્વિગ્નો ગર્ભસંવાસાદસ્તિ ગર્ભલયાન્વિતઃ ॥ ૨૫॥

આવિર્ભૂતપ્રબોધોઽસૌ ગર્ભદુઃખાદિસંયુતઃ ।
હા કષ્ટમિતિ નિર્વિણ્ણઃ સ્વાત્માનં શોશુચીત્યથ ॥ ૨૬॥

અનુભૂતા મહાસહ્યાઃ પુરા મર્મચ્છિદોઽસકૃત્ ।
કરંભવાલુકાસ્તપ્તાશ્ચાદહ્યન્તાસુખાશયાઃ ॥ ૨૭॥

જઠરાનલસંતપ્તપિત્તાખ્યરસવિપ્લુષઃ ।
ગર્ભાશયે નિમગ્નં તુ દહન્ત્યતિભૃશં તુ મામ્ ॥ ૨૮॥

ઉદર્યકૃમિવક્ત્રાણિ કૂટશાલ્મલિકણ્ટકૈઃ ।
તુલ્યાનિ ચ તુદન્ત્યાર્તં પાર્શ્વાસ્થિક્રકચાર્દિતમ્ ॥ ૨૯॥

ગર્ભે દુર્ગન્ધભૂયિષ્ઠે જઠરાગ્નિપ્રદીપિતે ।
દુઃખં મયાપ્તં યત્તસ્માત્કનીયઃ કુમ્ભપાકજમ્ ॥ ૩૦॥

પૂયાસૃક્શ્લેષ્મપાયિત્વં વાગ્તાશિત્વં ચ યદ્ભવેત્ ।
અશુચૌ કૃમિભાવશ્ચ તત્પ્રાપ્તં ગર્ભશાયિના ॥ ૩૧॥

ગર્ભશય્યાં સમારુહ્ય દુઃખં યાદૃઙ્ મયાપિ તત્ ।
નાતિશેતે મહાદુઃખં નિઃશેષનરકેષુ તત્ ॥ ૩૨॥

એવં સ્મરન્પુરા પ્રાપ્તા નાનાજાતીશ્ચ યાતનાઃ ।

મોક્ષોપાયમભિધ્યાયન્વર્તતેઽભ્યાસતત્પરઃ ॥ ૩૩॥

અષ્ટમે ત્વક્સ્મૃતી સ્યાતામોજસ્તેજશ્ચ હૃદ્ભવમ્ ।
શુભ્રમાપીતરક્તં ચ નિમિત્તં જીવિતં મતમ્ ॥ ૩૪॥

માતરં ચ પુનર્ગર્ભં ચઞ્ચલં તત્પ્રધાવતિ ।
તતો જાતોઽષ્ટમે ગર્ભો ન જીવત્યોજસોજ્ઝિતઃ ॥ ૩૫॥

કિંચિત્કાલમવસ્થાનં સંસ્કારાત્પીડિતાઙ્ગવત્ ।
સમયઃ પ્રસવસ્ય સ્યાન્માસેષુ નવમાદિષુ ॥ ૩૬॥

માતુરસ્રવહાં નાડીમાશ્રિત્યાન્વવતારિતા ।
નાભિસ્થનાડી ગર્ભસ્ય માત્રાહારરસાવહ ।
તેન જીવતિ ગર્ભોઽપિ માત્રાહારેણ પોષિતઃ ॥ ૩૭॥

અસ્થિયન્ત્રવિનિષ્પિષ્ટઃ પતિતઃ કુક્ષિવર્ત્મના ।
મેદોઽસૃગ્દિગ્ધસર્વાઙ્ગો જરાયુપુટસંવૃતઃ ॥ ૩૮॥

નિષ્ક્રામન્ભૃશદુઃખાર્તો રુદન્નુચ્ચૈરધોમુખઃ ।
યન્ત્રાદેવ વિનિર્મુક્તઃ પતત્યુત્તાનશાય્યુત ॥ ૩૯॥

અકિંચિત્કસ્તથા બાલો માંસપેશીસમાસ્થિતઃ ।
શ્વમાર્જારાદિદંષ્ટ્રિભ્યો રક્ષ્યતે દણ્ડપાણિભિઃ ॥ ૪૦॥

પિતૃવદ્રાક્ષસં વેત્તિ માતૃવડ્ડાકિનીમપિ ।
પૂયં પયોવદજ્ઞાનાદ્દીર્ઘકષ્ટં તુ શૈશવમ્ ॥ ૪૧॥

શ્લેષ્મણા પિહિતા નાડી સુષુમ્ના યાવદેવ હિ ।
વ્યક્તવર્ણં ચ વચનં તાવદ્વક્તું ન શક્યતે ॥ ૪૨॥

અત એવ ચ ગર્ભેઽપિ રોદિતું નૈવ શક્યતે ॥ ૪૩॥

દૃપ્તોઽથ યૌવનં પ્રાપ્ય મન્મથજ્વરવિહ્વલઃ ।
ગાયત્યકસ્માદુચ્ચૈસ્તુ તથા કસ્માચ્ચ વલ્ગતિ ॥ ૪૪॥

આરોહતિ તરૂન્વેગાચ્છાન્તાનુદ્વેજયત્યપિ ।
કામક્રોધમદાન્ધઃ સન્ન કાંશ્ચિદપિ વીક્ષતે ॥ ૪૫॥

અસ્થિમાંસશિરાલાયા વામાયા મન્મથાલયે ।
ઉત્તાનપૂતિમણ્ડૂકપાટિતોદરસન્નિભે ।
આસક્તઃ સ્મરબાણાર્ત આત્મના દહ્યતે ભૃશમ્ ॥ ૪૬॥

અસ્થિમાંસશિરાત્વગભ્યઃ કિમન્યદ્વર્તતે વપુઃ ।
વામાનાં માયયા મૂઢો ન કિંચિદ્વીક્ષતે જગત્ ॥ ૪૭॥

નિર્ગતે પ્રાણપવને દેહો હંત મૃગીદૃશઃ ।
યથાહિ જાયતે નૈવ વીક્ષ્યતે પઞ્ચષૈર્દિનૈઃ ॥ ૪૮॥

મહાપરિભવસ્થાનં જરાં પ્રાપ્યાતિદુઃખિતઃ ।
શ્લેષ્મણા પિહિતોરસ્કો જગ્ધમન્નં ન જીર્યતિ ॥ ૪૯॥

સન્નદન્તો મન્દદૃષ્ટિઃ કટુતિક્તકષાયભુક્ ।
વાતભુગ્નકટિગ્રીવકરોરુચરણોઽબલઃ ॥ ૫૦॥

ગદાયુતસમાવિષ્ટઃ પરિત્યક્તઃ સ્વબન્ધુભિઃ ।
નિઃશૌચો મલદિગ્ધાઙ્ગ આલિઙ્ગિતવરોષિતઃ ॥ ૫૧॥

ધ્યાયન્નસુલભાન્ભોગાન્કેવલં વર્તતે ચલઃ ।
સર્વેન્દ્રિયક્રિયાલોપાદ્ધસ્યતે બાલકૈરપિ ॥ ૫૨॥

તતો મૃતિજદુઃખસ્ય દૃષ્ટાન્તો નોપલભ્યતે ।
યસ્માદ્બિભ્યતિ ભૂતાનિ પ્રાપ્તાન્યપિ પરાં રુજમ્ ॥ ૫૩॥

નીયતે મૃત્યુના જન્તુઃ પરિષ્વક્તોઽપિ બન્ધુભિઃ ।
સાગરાન્તર્જલગતો ગરુડેનેવ પન્નગઃ ॥ ૫૪॥

હા કાન્તે હા ધનં પુત્રાઃ ક્રન્દમાનઃ સુદારુણમ્ ।
મણ્ડૂક ઇવ સર્પેણ મૃત્યુના નીયતે નરઃ ॥ ૫૫॥

મર્મસૂન્મથ્યમાનેષુ મુચ્યમાનેષુ સંધિષુ ।
યદ્દુઃખં મ્રિયમાણસ્ય સ્મર્યતાં તન્મુમુક્ષુભિઃ ॥ ૫૬॥

દૃષ્ટાવાક્ષિપ્યમાણાયાં સંજ્ઞયા હ્રિયમાણયા ।
મૃત્યુપાશેન બદ્ધસ્ય ત્રાતા નૈવોપલભ્યતે ॥ ૫૭॥

સંરુધ્યમાનસ્તમસા મચ્ચિત્તમિવાવિશન્ ।
ઉપાહૂતસ્તદા જ્ઞાતીનીક્ષતે દીનચક્ષુષા ॥ ૫૮॥

અયઃ પાશેન કાલેન સ્નેહપાશેન બન્ધુભિઃ ।
આત્માનં કૃષ્યમાણં તં વીક્ષતે પરિતસ્તથા ॥ ૫૯॥

હિક્કયા બાધ્યમાનસ્ય શ્વાસેન પરિશુષ્યતઃ ।

મૃત્યુનાકૃષ્યમાણસ્ય ન ખલ્વસ્તિ પરાયણમ્ ॥ ૬૦॥

સંસારયન્ત્રમારૂઢો યમદૂતૈરધિષ્ઠિતઃ ।
ક્વ યાસ્યામીતિ દુઃખાર્તઃ કાલપાશેન યોજિતઃ ॥ ૬૧॥

કિં કરોમિ ક્વ ગચ્છામિ કિં ગૃહ્ણામિ ત્યજામિ કિમ્ ।
ઇતિ કર્તવ્યતામૂઢઃ કૃચ્છ્રાદ્દેહાત્ત્યજત્યસૂન્ ॥ ૬૨॥

યાતનાદેહસંબદ્ધો યમદૂતૈરધિષ્ઠિતાઃ ।
ઇતો ગત્વાનુભવતિ યા યાસ્તા યમયાતનાઃ ।
તાસુ યલ્લભતે દુઃખં તદ્વક્તું ક્ષમતે કુતઃ ॥ ૬૩॥

કર્પૂરચન્દનાદ્યૈસ્તુ લિપ્યતે સતતં હિ યત્ ।
ભૂષણૈર્ભૂષ્યતે ચિત્રૈઃ સુવસ્ત્રૈઃ પરિવાર્યતે ॥ ૬૪॥

અસ્પૃશ્યં જાયતેઽપ્રેક્ષ્યં જીવત્યક્તં સદા વપુઃ ।
નિષ્કાસયન્તિ નિલયાત્ક્ષણં ન સ્થાપયન્ત્યપિ ॥ ૬૫॥

દહ્યતે ચ તતઃ કાષ્ઠૈસ્તદ્ભસ્મ ક્રિયતે ક્ષણાત્ ।
ભક્ષ્યતે વા સૃગાલૈશ્ચ ગૃધ્રકુક્કુરવાયસૈઃ ।
પુનર્ન દૃશ્યતે સોઽથ જન્મકોટિશતૈરપિ ॥ ૬૬॥

માતા પિતા ગુરુજનઃ સ્વજનો મમેતિ
    માયોપમે જગતિ કસ્ય ભવેત્પ્રતિજ્ઞા ।
એકો યતો વ્રજતો કર્મપુરઃસરોઽયં
    વિશ્રામવૃક્ષસદૃશઃ ખલુ જીવલોકઃ ॥ ૬૭॥

સાયં સાયં વાસવૃક્ષં સમેતાઃ
    પ્રાતઃ પ્રાતસ્તેન તેન પ્રયાન્તિ ।
ત્યક્ત્વાન્યોન્યં તં ચ વૃક્ષં
    વિહઙ્ગા યદ્વત્તદ્વજ્જ્ઞાતયોઽજ્ઞાતયશ્ચ ॥ ૬૮॥

મૃતિબીજં ભવેજ્જન્મ જન્મબીજં ભવેન્મૃતિઃ ।
ઘટયન્ત્રવદશ્રાન્તો બમ્ભ્રમીત્યનિશં નરઃ ॥ ૬૯॥

ગર્ભે પુંસઃ શુક્રપાતાદ્યદુક્તં મરણાવધિ ।
તદેતસ્ય મહાવ્યાધેર્મત્તો નાન્યોઽસ્તિ ભેષજમ્ ॥ ૭૦॥

ઇતિ શ્રીપદ્મપુરાણે ઉપરિભાગે શિવગીતાસૂપનિષત્સુ

બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શિવરાઘવસંવાદે
પિણ્ડોત્પત્તિકથનં નામાષ્ટમોઽધ્યાયઃ ॥ ૮ ॥

---

અથ નવમોઽધ્યાયઃ ॥

શ્રીભગવાનુવાચ ॥

દેહસ્વરૂપં વક્ષ્યામિ શ્રુણુષ્વાવહિતો નૃપ ।
મત્તો હિ જાયતે વિશ્વં મયૈવૈતત્પ્રધાર્યતે ।
મય્યેવેદમધિષ્ઠાને લીયતે શુક્તિરૌપ્યવત્ ॥ ૧॥

અહં તુ નિર્મલઃ પૂર્ણઃ સચ્ચિદાનન્દવિગ્રહઃ ।
અસંગો નિરહંકારઃ શુદ્ધં બ્રહ્મ સનાતનમ્ ॥ ૨॥

અનાદ્યવિદ્યાયુક્તઃ સન્ જગત્કારણતાં વ્રજે ॥ ૩॥

અનિર્વાચ્યા મહાવિદ્યા ત્રિગુણા પરિણામિની ।
રજઃ સત્ત્વં તમશ્ચેતિ ત્રિગુણાઃ પરિકીર્તિતાઃ ॥ ૪॥

સત્ત્વં શુક્લં સમાદિષ્ટં સુખજ્ઞાનાસ્પદં નૃણામ્ ।
દુઃખાસ્પદં રક્તવર્ણં ચઞ્ચલં ચ રજો મતમ્ ॥ ૫॥

તમઃ કૃષ્ણં જડં પ્રોક્તમુદાસીનં સુખાદિષુ ॥ ૬॥

અતો મમ સમાયોગાચ્છક્તિઃ સા ત્રિગુણાત્મિકા ।
અધિષ્ઠાને તુ મય્યેવ ભજતે વિશ્વરૂપતામ્ ।
શુક્તૌ રજતવદ્રજ્જૌ ભુજઙ્ગો યદ્વદેવ તુ ॥ ૭॥

આકાશાદીનિ જાયન્તે મત્તો ભૂતાનિ માયયા ।
તૈરારબ્ધમિદં વિશ્વં દેહોઽયં પાઞ્ચભૌતિકઃ ॥ ૮॥

પિતૃભ્યામશિતાદન્નાત્ષટ્કોશં જાયતે વપુઃ ।
સ્નાયવોઽસ્થીનિ મજ્જા ચ જાયન્તે પિતૃતસ્તથા ॥ ૯॥

ત્વઙ્માંશોણિતમિતિ માતૃતશ્ચ ભવન્તિ હિ ।
ભાવાઃ સ્યુઃ ષડ્વિધાસ્તસ્ય માતૃજાઃ પિતૃજાસ્તથા ।
રસજા આત્મજાઃ સત્ત્વસંભૂતાઃ સ્વાત્મજાસ્તથા ॥ ૧૦॥

મૃદવઃ શોણિતં મેદો મજ્જા પ્લીહા યકૃદ્ગુદમ્ ।
હૃન્નાભીત્યેવમાદ્યાસ્તુ ભાવા માતૃભવા મતાઃ ॥ ૧૧॥

શ્મશ્રુલોમકચસ્નાયુશિરાધમનયો નખાઃ ।
દશનાઃ શુક્રમિત્યાદ્યાઃ સ્થિરાઃ પિતૃસમુદ્ભવાઃ ॥ ૧૨॥

શરીરોપચિતિર્વર્ણો વૃદ્ધિસ્તૃપ્તિર્બલં સ્થિતિઃ ।
અલોલુપત્વમુત્સાહ ઇત્યાદિ રસજં વિદુઃ ॥ ૧૩॥

ઇચ્છા દ્વેષઃ સુખં દુઃખં ધર્માધર્મૌ ચ ભાવના ।
પ્રયત્નો જ્ઞાનમાયુશ્ચેન્દ્રિયાણીત્યેવમાત્મજાઃ ॥ ૧૪॥

જ્ઞાનેન્દ્રિયાણિ શ્રવણં સ્પર્શનં દર્શનં તથા ।
રસનં ઘ્રાણમિત્યાહુઃ પઞ્ચ તેષાં તુ ગોચરાઃ ॥ ૧૫॥

શબ્દઃ સ્પર્શસ્તથા રૂપં રસો ગન્ધ ઇતિ ક્રમાત્ ।
વાક્કરાઙ્ઘ્રિગુદોપસ્થાન્યાહુઃ કર્મેન્દ્રિયાણિ હિ ॥ ૧૬॥

વચનાદાનગમનવિસર્ગરતયઃ ક્રમાત્ ।
કર્મેન્દ્રિયાણાં જાનીયાન્મનશ્ચૈવોભયાત્મકમ્ ॥ ૧૭॥

ક્રિયાસ્તેષાં મનોબુદ્ધિરહંકારસ્તતઃ પરમ્ ।
અન્તઃકરણમિત્યાહુશ્ચિત્તં ચેતિ ચતુષ્ટયમ્ ॥ ૧૮॥

સુખં દુઃખં ચ વિષયૌ વિજ્ઞેયૌ મનસઃ ક્રિયાઃ ।
સ્મૃતિભીતિવિકલ્પાદ્યા બુદ્ધિઃ સ્યાન્નિશ્ચયાત્મિકા ।
અહં મમેત્યહંકારશ્ચિત્તં ચેતયતે યતઃ ॥ ૧૯॥

સત્ત્વાખ્યમન્તઃકરણં ગુણભેદાસ્ત્રિધા મતમ્ ।
સત્ત્વં રજસ્તમ ઇતિ ગુણાઃ સત્ત્વાત્તુ સાત્ત્વિકાઃ ॥ ૨૦॥

આસ્તિક્યશુદ્ધિધર્મૈકમતિપ્રભૃતયો મતાઃ ।
રજસો રાજસા ભાવાઃ કામક્રોધમદાદયઃ ॥ ૨૧॥

નિદ્રાલસ્યપ્રમાદાદિ વઞ્ચનાદ્યાસ્તુ તામસાઃ ।
પ્રસન્નેન્દ્રિયતારોગ્યાનાલસ્યાદ્યાસ્તુ સત્ત્વજાઃ ॥ ૨૨॥

દેહો માત્રાત્મકસ્તસ્માદાદત્તે તદ્ગુણાનિમાન્ ।
શબ્દઃ શ્રોત્રં મુખરતા વૈચિત્ર્યં સૂક્ષ્મતા ધૃતિઃ ॥ ૨૩॥

બલં ચ ગગનાદ્વાયોઃ સ્પર્શશ્ચ સ્પર્શનેન્દ્રિયમ્ ।
ઉત્ક્ષેપણમપક્ષેપાકુઞ્ચને ગમનં તથા ॥ ૨૪॥

પ્રસારણમિતીમાનિ પઞ્ચ કર્માણિ રૂક્ષતા ।
પ્રાણાપાનૌ તથા વ્યાનસમાનોદાનસંજ્ઞકાન્ ॥ ૨૫ ॥

નાગઃ કૂર્મશ્ચ કૃકલો દેવદત્તો ધનઞ્જયઃ ।
દશૈતા વાયુવિકૃતીસ્તથા ગૃહ્ણાતિ લાઘવમ્ ॥ ૨૬ ॥

તેષાં મુખ્યતરઃ પ્રાણો નાભેઃ કણ્ઠાદવસ્થિતઃ ।
ચરત્યસૌ નાસિકયોર્નાભૌ હૃદયપઙ્કજે ॥ ૨૭ ॥

શબ્દોચ્ચારણનિશ્વાસોચ્છ્વાસાદેરપિ કારણમ્ ॥ ૨૮ ॥

અપાનસ્તુ ગુદે મેઢ્રે કટિજઙ્ઘોદરેષ્વપિ ।
નાભિકણ્ઠે વંક્ષણયોરૂરુજાનુષુ તિષ્ઠતિ ।
તસ્ય મૂત્રપુરીષાદિવિસર્ગઃ કર્મ કીર્તિતમ્ ॥ ૨૯ ॥

વ્યાનોઽક્ષિશ્રોત્રગુલ્ફેષુ જિહ્વાઘ્રાણેષુ તિષ્ઠતિ ।
પ્રાણાયામધૃતિત્યાગગ્રહણાદ્યસ્ય કર્મ ચ ॥ ૩૦ ॥

સમાનો વ્યાપ્ય નિખિલં શરીરં વહ્નિના સહ ।
દ્વિસપ્તતિસહસ્રેષુ નાડીરન્ધ્રેષુ સંચરન્ ॥ ૩૧ ॥

ભુક્તપીતરસાન્સમ્યગાનયન્દેહપુષ્ટિકૃત્ ।
ઉદાનઃ પાદયોરાસ્તે હસ્તયોરઙ્ગસંધિષુ ॥ ૩૨ ॥

કર્માસ્ય દેહોન્નયનોત્ક્રમણાદિ પ્રકીર્તિતમ્ ।
ત્વગાદિધાતૂનાશ્રિત્ય પઞ્ચ નાગાદયઃ સ્થિતાઃ ॥ ૩૩ ॥

ઉદ્ગારાદિ નિમેષાદિ ક્ષુત્પિપાસાદિકં ક્રમાત્ ।
તન્દ્રીપ્રભૃતિ શોકાદિ તેષાં કર્મ પ્રકીર્તિતમ્ ॥ ૩૪ ॥

અગ્નેસ્તુ રોચકં રૂપં દીપ્તં પાકં પ્રકાશતામ્ ।
અમર્ષતીક્ષ્ણસૂક્ષ્માણામોજસ્તેજશ્ચ શૂરતામ્ ॥ ૩૫ ॥

મેધાવિતાં તથાઽઽદત્તે જલાત્તુ રસનં રસમ્ ।
શૈત્યં સ્નેહં દ્રવં સ્વેદં ગાત્રાદિમૃદુતામપિ ॥ ૩૬ ॥

ભૂમેર્ઘ્રાણેન્દ્રિયં ગન્ધં સ્થૈર્યં ધૈર્યં ચ ગૌરવમ્ ।
ત્વગસૃઙ્માંસમેદોઽસ્થિમજ્જાશુક્રાણિ ધાતવઃ ॥ ૩૭ ॥

અન્નં પુંસાશિતં ત્રેધા જાયતે જઠરાગ્નિના ।
મલઃ સ્થવિષ્ઠો ભાગઃ સ્યાન્મધ્યમો માંસતાં વ્રજેત્ ।

મનઃ કનિષ્ઠો ભાગઃ સ્યાત્તસ્માદન્નમયં મનઃ ॥ ૩૮॥

અપાં સ્થવિષ્ઠો મૂત્રં સ્યાન્મધ્યમો રુધિરં ભવેત્ ।
પ્રાણઃ કનિષ્ઠો ભાગઃ સ્યાત્તસ્માત્પ્રાણો જલાત્મકઃ ॥ ૩૯॥

તેજસોઽસ્થિ સ્થવિષ્ઠઃ સ્યાન્મજ્જા મધ્યમ સંભવઃ ।
કનિષ્ઠા વાઙ્મતા તસ્માત્તેજોઽવન્નાત્મકં જગત્ ॥ ૪૦॥

લોહિતાજ્જાયતે માંસં મેદો માંસસમુદ્ભવમ્ ।
મેદસોઽસ્થીનિ જાયન્તે મજ્જા ચાસ્થિસમુદ્ભવા ॥ ૪૧॥

નાડ્યોઽપિ માંસસંઘાતાચ્છુક્રં મજ્જાસમુદ્ભવમ્ ॥ ૪૨॥

વાતપિત્તકફાશ્ચાત્ર ધાતવઃ પરિકીર્તિતાઃ ।
દશાઞ્જલિ જલં જ્ઞેયં રસસ્યાઞ્જલયો નવ ॥ ૪૩॥

રક્તસ્યાષ્ટૌ પુરીષસ્ય સપ્ત સ્યુઃ શ્લેષ્મણશ્ચ ષટ્ ।
પિત્તસ્ય પઞ્ચ ચત્વારો મૂત્રસ્યાઞ્જલયસ્ત્રયઃ ॥ ૪૪॥

વસાયા મેદસો દ્વૌ તુ મજ્જા ત્વઞ્જલિસંમિતા ।
અર્ધાઞ્જલિ તથા શુક્રં તદેવ બલમુચ્યતે ॥ ૪૫॥

અસ્થ્નાં શરીરે સંખ્યા સ્યાત્ષષ્ટિયુક્તં શતત્રયમ્ ।
જલજાનિ કપાલાનિ રુચકાસ્તરણાનિ ચ ।
નલકાનીતિ તાન્યાહુઃ પઞ્ચધાસ્થીનિ સૂરયઃ ॥ ૪૬॥

દ્વે શતે ત્વસ્થિસંધીનાં સ્યાતાં તત્ર દશોત્તરે ।
રૌરવાઃ પ્રસરાઃ સ્કન્દસેચનાઃ સ્યુરુલૂખલાઃ ॥ ૪૭॥

સમુદ્ગા મણ્ડલાઃ શંખાવર્તા વામનકુણ્ડલાઃ ।
ઇત્યષ્ટધા સમુદ્દિષ્ટાઃ શરીરેષ્વસ્થિસંધયઃ ॥ ૪૮॥

સાર્ધકોટિત્રયં રોમ્ણાં શ્મશ્રુકેશાસ્ત્રિલક્ષકાઃ ।
દેહસ્વરૂપમેવં તે પ્રોક્તં દશરથાત્મજ ॥ ૪૯॥

યસ્માદસારો નાસ્ત્યેવ પદાર્થો ભુવનત્રયે ।
દેહેઽસ્મિન્નભિમાનેન ન મહોપાયબુદ્ધયઃ ॥ ૫૦॥

અહંકારેણ પાપેન ક્રિયન્તે હંત સાંપ્રતમ્ ।
તસ્માદેતત્સ્વરૂપં તુ વિબોદ્ધવ્યં મુમુક્ષિભિઃ ॥ ૫૧॥

ઇતિ શ્રીપદ્મપુરાણે ઉપરિભાગે શિવગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શિવરાઘવસંવાદે
દેહસ્વરૂપનિર્ણયો નામ નવમોઽધ્યાયઃ ॥ ૯ ॥

---

અથ દશમોઽધ્યાયઃ ॥

શ્રીરામ ઉવાચ ॥

ભગવન્નત્ર જીવોઽસૌ જન્તોર્દેહેઽવતિષ્ઠતે ।
જાયતે વા કુતો જીવઃ સ્વરૂપં ચાસ્ય કિં વદ ॥ ૧॥

દેહાન્તે કુત્ર વા યાતિ ગત્વા વા કુત્ર તિષ્ઠતિ ।
કથમાયાતિ વા દેહં પુનર્નાયાતિ વા વદ ॥ ૨॥

શ્રીભગવાનુવાચ ॥

સાધુ પૃષ્ટં મહાભાગ ગુહ્યાદ્ગુહ્યતરં હિ યત્ ।
દેવૈરપિ સુદુર્જ્ઞેયમિન્દ્રાદ્યૈર્વા મહર્ષિભિઃ ॥ ૩॥

અન્યસ્મૈ નૈવ વક્તવ્યં મયાપિ રઘુનન્દન ।
ત્વદ્ભક્ત્યાહં પરં પ્રીતો વક્ષ્યામ્યવહિતઃ શ્રૃણુ ॥ ૪॥

સત્યજ્ઞાનાત્મકોઽનન્તઃ પરમાનન્દવિગ્રહઃ ।
પરમાત્મા પરંજ્યોતિરવ્યક્તો વ્યક્તકારણમ્ ॥ ૫॥

નિત્યો વિશુદ્ધઃ સર્વાત્મા નિર્લેપોઽહં નિરઞ્જનઃ ।
સર્વધર્મવિહીનશ્ચ ન ગ્રાહ્યો મનસાપિ ચ ॥ ૬॥

નાહં સર્વેન્દ્રિયગ્રાહ્યઃ સર્વેષાં ગ્રાહકો હ્યહમ્ ।
જ્ઞાતાહં સર્વલોકસ્ય મમ જ્ઞાતા ન વિદ્યતે ॥ ૭॥

દૂરઃ સર્વવિકારાણાં પરિણામાદિકસ્ય ચ ॥ ૮॥

યતો વાચો નિવર્તન્તે અપ્રાપ્ય મનસા સહ ।
આનન્દં બ્રહ્મ માં જ્ઞાત્વા ન બિભેતિ કુતશ્ચન ॥ ૯॥

યસ્તુ સર્વાણિ ભૂતાનિ મય્યેવેતિ પ્રપશ્યતિ ।
માં ચ સર્વેષુ ભૂતેષુ તતો ન વિજુગુપ્સતે ॥ ૧૦॥

યસ્ય સર્વાણિ ભૂતાનિ હ્યાત્મૈવાભૂદ્વિજાનતઃ ।

કો મોહસ્તત્ર કઃ શોક એકત્વમનુપશ્યતઃ ॥ ૧૧॥

એષ સર્વેષુ ભૂતેષુ ગૂઢાત્મા ન પ્રકાશતે ।
દૃશ્યતે ત્વગ્ર્યયા બુદ્ધ્યા સૂક્ષ્મયા સૂક્ષ્મદર્શિભિઃ ॥ ૧૨॥

અનાદ્યવિદ્યયા યુક્તસ્તથાપ્યેકોઽહમવ્યયઃ ।
અવ્યાકૃતબ્રહ્મરૂપો જગત્કર્તાહમીશ્વરઃ ॥ ૧૩॥

જ્ઞાનમાત્રે યથા દૃશ્યમિદં સ્વપ્ને જગત્ત્રયમ્ ।
તદ્વન્મયિ જગત્સર્વં દૃશ્યતેઽસ્તિ વિલીયતે ॥ ૧૪॥

નાનાવિદ્યાસમાયુક્તો જીવત્વેન વસામ્યહમ્ ।
પઞ્ચ કર્મેન્દ્રિયાણ્યેવ પઞ્ચ જ્ઞાનેન્દ્રિયાણિ ચ ॥ ૧૫॥

મનો બુદ્ધિરહંકારશ્ચિત્તં ચેતિ ચતુષ્ટયમ્ ।
વાયવઃ પઞ્ચમિલિતા યાન્તિ લિઙ્ગશરીરતામ્ ॥ ૧૬
તત્રાવિદ્યાસમાયુક્તં ચૈતન્યં પ્રતિબિમ્બિતમ્ ।
વ્યાવહારિકજીવસ્તુ ક્ષેત્રજ્ઞઃ પુરુષોઽપિ ચ ॥ ૧૭॥

સ એવ જગતાં ભોક્તાનાદ્યયોઃ પુણ્યપાપયોઃ ।
ઇહામુત્ર ગતી તસ્ય જાગ્રત્સ્વપ્નાદિભોક્તૃતા ॥ ૧૮॥

યથા દર્પણકાલિમ્ના મલિનં દૃશ્યતે મુખમ્ ।
તદ્વદન્તઃકરણગૈર્દોષૈરાત્માપિ દૃશ્યતે ॥ ૧૯॥

પરસ્પરાધ્યાસવશાત્સ્યાદન્તઃકરણાત્મનોઃ ॥

એકીભાવાભિમાનેન પરાત્મા દુઃખભાગિવ॥ ૨૦॥

મરુભૂમૌ જલત્વેન મધ્યાહ્નાર્કમરીચિકાઃ ।
દૃશ્યન્તે મૂઢચિત્તસ્ય ન હ્યાર્દ્રાસ્તાપકારકાઃ ॥ ૨૧॥

તદ્વદાત્માપિ નિર્લેપો દૃશ્યતે મૂઢચેતસામ્ ।
સ્વાવિદ્યાત્માત્મદોષેણ કર્તૃત્વાધિકધર્મવાન્ ॥ ૨૨॥

તત્ર ચાન્નમયે પિણ્ડે હૃદિ જીવોઽવતિષ્ઠતે ।
આનખાગ્રં વ્યાપ્ય દેહં તદ્ભ્રુવેઽવહિતઃ શ્રુણુ ।
સોઽયં તદભિધાનેન માંસપિણ્ડો વિરાજતે ॥ ૨૩॥

નાભેરૂર્ધ્વમધઃ કણ્ઠાદ્વ્યાપ્ય તિષ્ઠતિ યઃ સદા ।
તસ્ય મધ્યેઽસ્તિ હૃદયં સનાલં પદ્મકોશવત્ ॥ ૨૪॥

અધોમુખં ચ તત્રાસ્તિ સૂક્ષ્મં સુષિરમુત્તમમ્ ।
દહરાકાશમિત્યુક્તં તત્ર જીવોઽવતિષ્ઠતે ॥ ૨૫॥

વાલાગ્રશતભાગસ્ય શતધા કલ્પિતસ્ય ચ ।
ભાગો જીવઃ સ વિજ્ઞેયઃ સ ચાનન્ત્યાય કલ્પતે ॥ ૨૬॥

કદમ્બકુસુમોદ્બદ્ધકેસરા ઇવ સર્વતઃ ।
પ્રસૃતા હૃદયાન્નાડ્યો યાભિર્વ્યાપ્તં શરીરકમ્ ॥ ૨૭॥

હિતં બલં પ્રયચ્છન્તિ તસ્માત્તેન હિતાઃ સ્મૃતાઃ ।
દ્વાસપ્તતિસહસ્રૈસ્તાઃ સંખ્યાતા યોગવિત્તમૈઃ ॥ ૨૮॥

હૃદયાત્તાસ્તુ નિષ્ક્રાન્તા યથાર્કાદ્રશ્મયસ્તથા ।
એકોત્તરશતં તાસુ મુખ્યા વિષ્વગ્વિનિર્ગતઃ ॥ ૨૯॥

પ્રતીન્દ્રિયં દશ દશ નિર્ગતા વિષયોન્મુખાઃ ।
નાડ્યઃ શર્માદિહેતુત્વાત્ સ્વપ્નાદિફલભુક્તયે ॥ ૩૦॥

વહન્ત્યમ્ભો યથા નદ્યો નાડ્યઃ કર્મફલં તથા ।
અનન્તૈકોર્ધ્વગા નાડી મૂર્ધપર્યન્તમઞ્જસા ॥ ૩૧॥

સુષુમ્નેતિ માદિષ્ટા તયા ગચ્છન્વિમુચ્યતે ।
તયોપચિતચૈતન્યં જીવાત્માનં વિદુર્બુધાઃ ॥ ૩૨॥

યથા રાહુરદૃશ્યોઽપિ દૃશ્યતે ચન્દ્રમણ્ડલે ।
તદ્વત્સર્વગતોઽપ્યાત્મા લિઙ્ગદેહે હિ દૃશ્યતે ॥ ૩૩॥

દૃશ્યમાને યથા કુંભે ઘટાકાશોઽપિ દૃશ્યતે ।
તદ્વત્સર્વગતોઽપ્યાત્મા લિઙ્ગદેહે હિ દૃશ્યતે ॥ ૩૪॥

નિશ્ચલઃ પરિપૂર્ણોઽપિ ગચ્છતીત્યુપચર્યતે ।
જાગ્રત્કાલે યથાજ્ઞેયમભિવ્યક્તવિશેષધીઃ ॥ ૩૫॥

વ્યાપ્નોતિ નિષ્ક્રિયઃ સર્વાન્ ભાનુર્દશ દિશો યથા ।
નાડીભિર્વૃત્તયો યાન્તિ લિઙ્ગદેહસમુદ્ભવાઃ ॥ ૩૬॥

તત્તત્કર્માનુસારેણ જાગ્રદ્ભોગોપલબ્ધયે ।
ઇદં લિઙ્ગશરીરાખ્યમામોક્ષં ન વિનશ્યતિ ॥ ૩૭॥

આત્મજ્ઞાનેન નષ્ટેઽસ્મિન્સાવિદ્યે સ્વશરીરકે ।

આત્મસ્વરૂપાવસ્થાનં મુક્તિરિત્યભિધીયતે ॥ ૩૮॥

ઉત્પાદિતે ઘટે યદ્વદ્ઘટાકાશત્વમૃચ્છતિ ।
ઘટે નષ્ટે યથાકાશઃ સ્વરૂપેણાવતિષ્ઠતે ॥ ૩૯॥

જાગ્રત્કર્મક્ષયવશાત્સ્વપ્નભોગ ઉપસ્થિતે ।
બોધાવસ્થાં તિરોધાય દેહાદ્યાશ્રયલક્ષણામ્ ॥ ૪૦॥

કર્મોદ્ભાવિતસંસ્કારસ્તત્ર સ્વપ્નરિરંસયા ।
અવસ્થાં ચ પ્રયાત્યન્યાં માયાવી ચાત્મમાયયા ॥ ૪૧॥

ઘટાદિવિષયાન્સર્વાન્બુદ્ધ્યાદિકરણાનિ ચ ।
ભૂતાનિ કર્મવશતો વાસનામાત્રસંસ્થિતાન્ ॥ ૪૨॥

એતાન્ પશ્યન્ સ્વયંજ્યોતિઃ સાક્ષ્યાત્મા વ્યવતિષ્ઠતે ॥ ૪૩॥

અત્રાન્તઃકરણાદીનાં વાસનાદ્વાસનાત્મતા ।
વાસનામાત્રસાક્ષિત્વં તેન તસ્ય પરાત્મનઃ ॥ ૪૪॥

વાસનાભિઃ પ્રપઞ્ચોઽત્ર દૃશ્યતે કર્મચોદિતઃ ।
જાગ્રદ્ભૂમૌ યથા તદ્વત્કર્તૃકર્મક્રિયાત્મકઃ ॥ ૪૫॥

નિઃશેષબુદ્ધિસાક્ષ્યાત્મા સ્વયમેવ પ્રકાશતે ।
વાસનામાત્રસાક્ષિત્વં સાક્ષિણઃ સ્વાપ ઉચ્યતે ॥ ૪૬॥

ભૂતજન્મનિ યદ્ભૂતં કર્મ તદ્વાસનાવશાત્ ।
નેદીયસ્ત્વાદ્વયસ્યાદ્યે સ્વપ્નં પ્રાયઃ પ્રપશ્યતિ ॥ ૪૭॥

મધ્યે વયસિ કાર્કશ્યાત્કરણાનામિહાર્જિતઃ ।
વીક્ષતે પ્રાયશઃ સ્વપ્નં વાસનાકર્મણોર્વશાત્ ॥ ૪૮॥

ઇયાસુઃ પરલોકં તુ કર્મવિદ્યાદિસંભૃતમ્ ।
ભાવિનો જન્મનો રૂપં સ્વપ્ન આત્મા પ્રપશ્યતિ ॥ ૪૯॥

યદ્વત્પ્રપતનાચ્છ્યેનઃ શ્રાન્તો ગગનમણ્ડલે ।
આકુઞ્ચ્ય પક્ષૌ યતતે નીડે નિલયનાયનીઃ ॥ ૫૦॥

એવં જાગ્રત્સ્વપ્નભૂમૌ શ્રાન્ત આત્માભિસંચરન્ ।
આપીતકરણગ્રામઃ કારણેનૈતિ ચૈકતામ્ ॥ ૫૧॥

નાડીમાર્ગૈરિન્દ્રિયાણામાકૃષ્યાદાય વાસનાઃ ।

સર્વં ગ્રસિત્વા કાર્યં ચ વિજ્ઞાનાત્મા વિલીયતે ॥ ૫૨॥

ઈશ્વારાખ્યેઽવ્યાકૃતેઽથ યથા સુખમયો ભવેત્ ।
કૃત્સ્નપ્રપઞ્ચવિલયસ્તથા ભવતિ ચાત્મનઃ ॥ ૫૩॥

યોષિતઃ કામ્યમાનાયાઃ સંભોગાન્તે યથા સુખમ્ ।
સ આનન્દમયોઽબાહ્યો નાન્તરઃ કેવલસ્તથા ॥ ૫૪॥

પ્રાજ્ઞાત્માનં સમાસાદ્ય વિજ્ઞાનાત્મા તથૈવ સઃ ।
વિજ્ઞાનાત્મા કારણાત્મા તથા તિષ્ઠંસ્તથાપિ સઃ ॥ ૫૫॥

અવિદ્યાસૂક્ષ્મવૃત્ત્યાનુભવત્યેવ સુખં યથા ।
તથાહં સુખમસ્વાપ્સં નૈવ કિઞ્ચિદવેદિષમ્।૫૬॥

અજ્ઞાનમપિ સાક્ષ્યાદિ વૃત્તિભિશ્ચાનુભૂયતે ।
ઇત્યેવં પ્રત્યભિજ્ઞાપિ પશ્ચાત્તસ્યોપજાયતે ॥ ૫૭॥

જાગ્રત્સ્વપ્નસુષુપ્ત્યાખ્યમેવેહામુત્ર લોકયોઃ ।
પશ્ચાત્કર્મવશાદેવ વિસ્ફુલિઙ્ગા યથાનલાત્ ।
જાયન્તે કારણાદેવ મનોબુદ્ધ્યાદિકાનિ તુ ॥ ૫૮॥

પયઃપૂર્ણો ઘટો યદ્વન્નિમગ્નઃ સલિલાશયે ।
તૈરેવિદ્ધત આયાતિ વિજ્ઞાનાત્મા તથૈત્યજાત્ ॥ ૫૯॥

વિજ્ઞાનાત્મા કારણાત્મા તથા તિષ્ઠંસ્તથાપિ સઃ ।
દૃશ્યતે સત્સુ તેષ્વેવ નષ્ટેષ્વાયાત્યદૃશ્યતામ્ ॥ ૬૦॥

એકાકારોઽર્યમા તત્તત્કાર્યેષ્વિવ પરઃ પુમાન્ ।
કૂટસ્થો દૃશ્યતે તદ્વદ્ગચ્છત્યાગચ્છતીવ સઃ॥ ૬૧॥

મોહમાત્રાન્તરાયત્વાત્સર્વં તસ્યોપપદ્યતે ।
દેહાદ્યતીત આત્માપિ સ્વયંજ્યોતિઃ સ્વભાવતઃ ॥ ૬૨॥

એવં જીવસ્વરૂપં તે પ્રોક્તં દશરથાત્મજ ॥ ૬૩॥

ઇતિ શ્રીપદ્મપુરાણે ઉપરિભાગે શિવગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શિવરાઘવસંવાદે
જીવસ્વરૂપકથનં નામ દશમોઽધ્યાયઃ ॥ ૧૦ ॥

અથ એકાદશોઽધ્યાયઃ ॥

શ્રીભગવાનુવાચ ॥

દેહાન્તરગતિં તસ્ય પરલોકગતિં તથા ।
વક્ષ્યામિ નૃપશાર્દૂલ મત્તઃ શ‍ૃણુ સમાહિતઃ ॥ ૧॥

ભુક્તં પીતં યદસ્ત્યત્ર તદ્રસાદામબન્ધનમ્ ।
સ્થૂલદેહસ્ય લિઙ્ગસ્ય તેન જીવનધારણમ્ ॥ ૨॥

વ્યાધિના જરયા વાપિ પીડ્યતે જાઠરોઽનલઃ ।
શ્લેષ્મણા તેન ભુક્તાન્નં પીતં વા ન પચત્યલમ્ ॥ ૩॥

ભુક્તપીતરસાભાવાદાશુ શુષ્યન્તિ ધાતવઃ ।
ભુક્તપીતરસેનૈવ દેહં લિમ્પન્તિ વાયવઃ ॥ ૪॥

સમીકરોતિ યસ્માત્તત્સમાનો વાયુરુચ્યતે ।
તદાનીં તદ્રસાભાવાદામબન્ધનહાનિતઃ ॥ ૫॥

પરિપક્વરસત્વેન યથા ગૌરવતઃ ફલમ્ ।
સ્વયમેવ પતત્યાશુ તથા લિઙ્ગં તનોર્વ્રજેત્ ॥ ૬॥

તત્તત્સ્થાનાદપાકૃષ્ય હૃષીકાણાં ચ વાસનાઃ ।
આધ્યાત્મિકાધિભૂતાનિ હૃત્પદ્મે ચૈકતાં ગતઃ ॥ ૭॥

તદોર્ધ્વગઃ પ્રાણવાયુઃ સંયુક્તો નવવાયુભિઃ ।
ઊર્ધ્વોચ્છ્વાસી ભવત્યેષ તથા તેનૈકતં ગતઃ ॥ ૮॥

ચક્ષુષો વાથ મૂર્ધ્નો વા નાડીમાર્ગં સમાશ્રિતઃ ।
વિદ્યાકર્મસમાયુક્તો વાસનાભિશ્ચ સંયુતઃ।
પ્રાજ્ઞાત્માનં સમાશ્રિત્ય વિજ્ઞાનાત્મોપસર્પતિ ॥ ૯॥

યથા કુમ્ભો નીયમાનો દેશાદ્દેશાન્તરં પ્રતિ ।
ખપૂર્ણ એવ સર્વત્ર સ સાકાશોઽપિ તત્ર તુ ॥ ૧૦॥

ઘટાકાશાખ્યતાં યાતિ તદ્વલ્લિઙ્ગં પરાત્મનઃ ॥ ૧૧॥

પુનર્દેહાન્તરં યાતિ યથા કર્માનુસારતઃ ।
આમોક્ષાત્સંચરેત્યેવં મત્સ્યઃ કૂલદ્વયં યથા ॥ ૧૨॥

પાપભોગાય ચેદ્ગચ્છેદ્યમદૂતૈરધિષ્ઠિતઃ ।
યાતનાદેહમાશ્રિત્ય નરકાનેવ કેવલમ્ ॥ ૧૩॥

ઇષ્ટાપૂર્તાદિકર્માણિ યોઽનુતિષ્ઠતિ સર્વદા ।
પિતૃલોકં વ્રજત્યેષ ધૂમમાશ્રિત્ય બર્હિષઃ ॥ ૧૪॥

ધૂમાદ્રાત્રિં તતઃ કૃષ્ણપક્ષં તસ્માચ્ચ દક્ષિણમ્ ।
અયનં ચ તતો લોકં પિતૃણાં ચ તતઃ પરમ્ ।
ચન્દ્રલોકે દિવ્યદેહં પ્રાપ્ય ભુઙ્ક્તે પરાં શ્રિયમ્ ॥ ૧૫॥

તત્ર ચન્દ્રમસા સોઽસૌ યાવત્કર્મફલં વસેત્ ।
તથૈવ કર્મશેષેણ યથેતં પુનરાવ્રજેત્ ॥ ૧૬॥

વપુર્વિહાય જીવત્વમાસાદ્યાકાશમેતિ સઃ ।
આકાશાદ્વાયુમાગત્ય વાયોરમ્ભો વ્રજત્યથ ॥ ૧૭॥

અદ્ભ્યો મેઘં સમાસાદ્ય તતો વૃષ્ટિર્ભવેદસૌ ।
તતો ધાન્યાનિ ભક્ષ્યાણિ જાયતે કર્મચોદિતઃ ॥ ૧૮॥

યોનિમન્યે પ્રપદ્યન્તે શરીરત્વાય દેહિનઃ ।
મુક્તિમન્યેઽનુસંયાન્તિ યથાકર્મ યથાશ્રુતમ્ ॥ ૧૯॥

તતોઽન્નત્વં સમાસાદ્ય પિતૃભ્યાં ભુજ્યતે પરમ્ ।
તતઃ શુક્રં રજશ્ચૈવ ભૂત્વા ગર્ભોઽભિજાયતે ॥ ૨૦॥

તતઃ કર્માનુસારેણ ભવેત્સ્ત્રીપુંનપુંસકઃ ।
એવં જીવગતિઃ પ્રોક્તા મુક્તિં તસ્ય વદામિ તે ॥ ૨૧॥

યસ્તુ શાન્ત્યાદિયુક્તઃ સન્સદા વિદ્યારતો ભવેત્ ।
સ યાતિ દેવયાનેન બ્રહ્મલોકાવધિં નરઃ ॥ ૨૨॥

અર્ચિર્ભૂત્વા દિનં પ્રાપ્ય શુક્લપક્ષમથો વ્રજેત્ ।
ઉત્તરાયણમાસાદ્ય સંવત્સરમથો વ્રજેત્ ॥ ૨૩॥

આદિત્યચન્દ્રલોકૌ તુ વિદ્યુલ્લોકમતઃ પરમ્ ।
અથ દિવ્યઃ પુમાન્કશ્ચિદ્બ્રહ્મલોકાદિહૈતિ સઃ ॥ ૨૪॥

દિવ્યે વપુષિ સંધાય જીવમેવં નયત્યસૌ ॥ ૨૫॥

બ્રહ્મલોકે દિવ્યદેહે ભુક્ત્વા ભોગાન્યથેપ્સિતાન્ ।
તત્રોષિત્વા ચિરં કાલં બ્રહ્મણા સહ મુચ્યતે ॥ ૨૬॥

શુદ્ધબ્રહ્મરતો યસ્તુ ન સ યાત્યેવ કુત્રચિત્ ।

તસ્ય પ્રાણા વિલીયન્તે જલે સૈન્ધવખિલ્યવત્ ॥ ૨૭॥

સ્વપ્નદૃષ્ટા યથા સૃષ્ટિઃ પ્રબુદ્ધસ્ય વિલીયતે ।
બ્રહ્મજ્ઞાનવતસ્તદ્વદ્વિલીયન્તે તદૈવ તે ।
વિદ્યાકર્મવિહીનો યસ્તૃતીયં સ્થાનમેતિ સઃ ॥ ૨૮।
ભુક્ત્વા ચ નરકાન્ઘોરાન્મહારૌરવરૌરવાન્ ।
પશ્ચાત્પ્રાક્તનશેષેણ ક્ષુદ્રજન્તુર્ભવેદસૌ ॥ ૨૯॥

યૂકામશકદંશાદિ જન્માસૌ લભતે ભુવિ ।
એવં જીવગતિઃ પ્રોક્તા કિમન્યચ્છ્રોતુમિચ્છસિ ॥ ૩૦॥

શ્રીરામ ઉવાચ ॥

ભગવન્યત્ત્વયા પ્રોક્તં ફલં તજ્જ્ઞાનકર્મણોઃ ।
બ્રહ્મલોકે ચંદ્રલોકે ભુઙ્ક્તે ભોગાનિતિ પ્રભો ॥ ૩૧॥

ગન્ધર્વાદિષુ લોકેષુ કથં ભોગઃ સમીરિતઃ ।
દેવત્વં પ્રાપ્નુયાત્કશ્ચિત્કશ્ચિદિન્દ્રત્વમેતિ ચ ॥ ૩૨॥

એતત્કર્મફલં વાસ્તુ વિદ્યાફલમથાપિ વા ।
તદ્બ્રૂહિ ગિરિજાકાન્ત તત્ર મે સંશયો મહાન્ ॥ ૩૩॥

શ્રીભગવાનુવાચ ॥

તદ્વિદ્યાકર્મણોરેવાનુસારેણ ફલં ભવેત્ ।
યુવા ચ સુન્દરઃ શૂરો નીરોગો બલવાન્ ભવેત્ ॥ ૩૪॥

સપ્તદ્વીપાં વસુમતીં ભુઙ્ક્તે નિષ્કણ્ટકં યદિ ।
સ પ્રોક્તો માનુષાનન્દસ્તસ્માચ્છતગુણો મતઃ ॥ ૩૫॥

મનુષ્યસ્તપસા યુક્તો ગન્ધર્વો જાયતેઽસ્ય તુ ।
તસ્માચ્છતગુણો દેવગન્ધર્વાણાં ન સંશયઃ ॥ ૩૬॥

એવં શતગુણાનન્દ ઉત્તરોત્તરતો ભવેત્ ।
પિતૃણાં ચિરલોકાનામાજાનસુરસમ્પદામ્ ॥ ૩૭॥

દેવતાનામથેન્દ્રસ્ય ગુરોસ્તદ્વત્પ્રજાપતેઃ ।
બ્રહ્મણશ્ચૈવમાનન્દઃ પુરસ્તાદુત્તરોત્તરઃ ॥ ૩૮॥

જ્ઞાનાધિક્યાત્સુખાધિક્યં નાન્યદસ્તિ સુરાલયે ।
શ્રોત્રિયોઽવૃજિનોઽકામહતો યશ્ચ દ્વિજો ભવેત્ ॥ ૩૯॥

તસ્યાપ્યેવં સમાખ્યાતા આનન્દાશ્ચોત્તરોત્તરમ્ ।
આત્મજ્ઞાનાત્પરં નાસ્તિ તસ્માદ્દશરથાત્મજ ॥ ૪૦॥

બ્રાહ્મણઃ કર્મભિર્નૈવ વર્ધતે નૈવ હીયતે ।
ન લિપ્યતે પાતકેન કર્મણા જ્ઞાનવાન્યદિ ॥ ૪૧॥

તસ્માત્સર્વાધિકો વિભો જ્ઞાનવાનેવ જાયતે ।
જ્ઞાત્વા યઃ કુરુતે કર્મ તસ્યાક્ષય્યફલં લભેત્ ॥ ૪૨॥

યત્ફલં લભતે મર્ત્યઃ કોટિબ્રાહ્મણભોજનૈઃ ।
તત્ફલં સમવાપ્નોતિ જ્ઞાનિનં યસ્તુ ભોજયેત્ ॥ ૪૩॥

જ્ઞાનવન્તં દ્વિજં યસ્તુ દ્વિષતે ચ નરાધમઃ ।
સ શુષ્યમાણો મ્રિયતે યસ્માદીશ્વર એવ સઃ ॥ ૪૪॥

ઉપાસકો ન યાત્યેવ યસ્માત્પુનરધોગતિમ્ ।
ઉપાસનરતો ભૂત્વા તસ્માદાસ્સ્વ સુખી નૃપ ॥ ૪૫॥

ઇતિ શ્રીપદ્મપુરાણે ઉપરિભાગે શિવગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શિવરાઘવસંવાદે
જીવગત્યાદિનિરૂપણં નામૈકાદશોઽધ્યાયઃ ॥ ૧૧ ॥

---

અથ દ્વાદશોઽધ્યાયઃ ॥

શ્રીરામ ઉવાચ ॥

ભગવન્દેવદેવેશ નમસ્તેઽસ્તુ મહેશ્વર ।
ઉપાસનવિધિં બ્રૂહિ દેશં કાલં ચ તસ્ય તુ ॥ ૧॥

અઙ્ગાનિ નિયમાંશ્ચૈવ મયિ તેઽનુગ્રહો યદિ ॥

ઈશ્વર ઉવાચ ॥

શૃણુ રામ પ્રવક્ષ્યામિ દેશં કાલમુપાસને ॥ ૨॥

સર્વાકારોઽહમેવૈકઃ સચ્ચિદાનન્દવિગ્રહઃ ।
મદંશેન પરિચ્છિન્ના દેહાઃ સર્વદિવૌકસામ્ ॥ ૩॥

યે ત્વન્યદેવતાભક્તા યજન્તે શ્રદ્ધયાન્વિતાઃ ।

તેઽપિ મામેવ રાજેન્દ્ર યજન્ત્યવિધિપૂર્વકમ્ ॥ ૪॥

યસ્માત્સર્વમિદં વિશ્વં મત્તો ન વ્યતિરિચ્યતે ।
સર્વક્રિયાણાં ભોક્તાહં સર્વસ્યાહં ફલપ્રદઃ ॥ ૫॥

યેનાકારેણ યે મર્ત્યા મામેવૈકમુપાસતે ।
તેનાકારેણ તેભ્યોઽહં પ્રસન્નો વાઞ્છિતં દદે ॥ ૬॥

વિધિનાઽવિધિના વાપિ ભક્ત્યા યે મામુપાસતે ।
તેભ્યઃ ફલં પ્રયચ્છામિ પ્રસન્નોઽહં ન સંશયઃ ॥ ૭॥

અપિ ચેત્સુદુરાચારો ભજતે મામનન્યભાક્ ।
સાધુરેવ સ મન્તવ્યઃ સમ્યગ્વ્યવસિતો હિ સઃ ॥ ૮॥

સ્વજીવત્વેન યો વેત્તિ મામેવૈકમનન્યધીઃ ।
તં ન સ્પૃશન્તિ પાપાનિ બ્રહ્મહત્યાદિકાન્યપિ ॥ ૯॥

ઉપાસાવિધયસ્તત્ર ચત્વારઃ પરિકીર્તિતાઃ ।
સમ્પદારોપસંવર્ગાધ્યાસા ઇતિ મનીષિભિઃ ॥ ૧૦॥

અલ્પસ્ય ચાધિકત્વેન ગુણયોગાદ્વિચિન્તનમ્ ।
અનન્તં વૈ મન ઇતિ સમ્પદ્વિધિરુદીરિતઃ ॥ ૧૧॥

વિધાવારોપ્ય યોપાસા સારોપઃ પરિકીર્તિતઃ ।
યદ્વદોઙ્કારમુદ્ગીથમુપાસીતેત્યુદાહૃતઃ ॥ ૧૨॥

આરોપો બુદ્ધિપૂર્વેણ ય ઉપાસાવિધિશ્ચ સઃ ।
યોષિત્યગ્નિમતિર્યત્તદધ્યાસઃ સ ઉદાહૃતઃ ॥ ૧૩॥

ક્રિયાયોગેન ચોપાસાવિધિઃ સંવર્ગ ઉચ્યતે ।
સંવર્તવાયુઃ પ્રલયે ભૂતાન્યેકોઽવસીદતિ ॥ ૧૪॥

ઉપસંગમ્ય બુદ્ધ્યા યદાસનં દેવતાત્મના ।
તદુપાસનમન્તઃ સ્યાત્તદ્બહિઃ સમ્પદાદયઃ ॥ ૧૫॥

જ્ઞાનાન્તરાનન્તરિતસજાતિજ્ઞાનસંહતેઃ ।
સમ્પન્નદેવતાત્મત્વમુપાસનમુદીરિતમ્ ॥ ૧૬॥

સમ્પદાદિષુ બાહ્યેષુ દૃઢબુદ્ધિરુપાસનમ્ ।
કર્મકાલે તદઙ્ગેષુ દૃષ્ટિમાત્રમુપાસનમ્ ।
ઉપાસનમિતિ પ્રોક્તં તદઙ્ગાનિ બ્રુવે શૃણુ ॥ ૧૭॥

તીર્થક્ષેત્રાદિગમનં શ્રદ્ધાં તત્ર પરિત્યજેત્ ।
સ્વચિત્તૈકાગ્રતા યત્ર તત્રાસીત સુખં દ્વિજઃ ॥ ૧૮॥

કમ્બલે મૃદુતલ્પે વા વ્યાઘ્રચર્મણિ વાસ્થિતઃ ।
વિવિક્તદેશે નિયતઃ સમગ્રીવશિરસ્તનુઃ ॥ ૧૯॥

અત્યાશ્રમસ્થઃ સકલાનીન્દ્રિયાણિ નિરુધ્ય ચ ।
ભક્ત્યાથ સ્વગુરું નત્વા યોગં વિદ્વાન્પ્રયોજયેત્ ॥ ૨૦॥

યસ્ત્વવિજ્ઞાનવાન્ભવત્યયુક્તમનસા સદા ।
તસ્યેન્દ્રિયાણ્યવશ્યાનિ દુષ્ટાશ્વાઇવ સારથેઃ ॥ ૨૧॥

વિજ્ઞાની યસ્તુ ભવતિ યુક્તેન મનસા સદા ।
તસ્યેન્દ્રિયાણિ વશ્યાનિ સદશ્વા ઇવ સારથેઃ ॥ ૨૨॥

યસ્ત્વવિજ્ઞાનવાન્ ભવત્યમનસ્કઃ સદાઽશુચિઃ ।
ન સ તત્પદમાપ્નોતિ સંસારમધિગચ્છતિ ॥ ૨૩॥

વિજ્ઞાની યસ્તુ ભવતિ સમનસ્કઃ સદા શુચિઃ ।
સ તત્પદમવાપ્નોતિ યસ્માદ્ભૂયો ન જાયતે ॥ ૨૪॥

વિજ્ઞાનસારથિર્યસ્તુ મનઃ પ્રગ્રહ એવ ચ ।
સોઽધ્વનઃ પારમાપ્નોતિ મમૈવ પરમં પદમ્ ॥ ૨૫॥

હૃત્પુણ્ડરીકં વિરજં વિશુદ્ધં વિશદં તથા ।
વિશોકં ચ વિચિન્ત્યાત્ર ધ્યાયેન્માં પરમેશ્વરમ્ ॥ ૨૬॥

અચિન્ત્યરૂપમવ્યક્તમનન્તમમૃતં શિવમ્ ।
આદિમધ્યાન્તરહિતં પ્રશાન્તં બ્રહ્મ કારણમ્ ॥ ૨૭॥

એકં વિભું ચિદાનન્દમરૂપમજમદ્ભુતમ્ ।
શુદ્ધસ્ફટિકસંકાશમુમાદેહાર્ધધારિણમ્ ॥ ૨૮॥

વ્યાઘ્રચર્મામ્બરધરં નીલકણ્ઠં ત્રિલોચનમ્ ।
જટાધરં ચન્દ્રમૌલિં નાગયજ્ઞોપવીતિનમ્ ॥ ૨૯॥

વ્યાઘ્રચર્મોત્તરીયં ચ વરેણ્યમભયપ્રદમ્ ।
પરાભ્યામૂર્ધ્વહસ્તાભ્યાં બિભ્રાણં પરશું મૃગમ્ ॥ ૩૦॥

કોટિમધ્યાહ્નસૂર્યાભં ચન્દ્રકોટિસુશીતલમ્ ।

ચન્દ્રસૂર્યાગ્નિનયનં સ્મેરવક્ત્રસરોરુહમ્ ॥ ૩૧॥

ભૂતિભૂષિતસર્વાઙ્ગં સર્વાભરણભૂષિતમ્ ।
એવમાત્મારણિં કૃત્વા પ્રણવં ચોત્તરારણિમ્ ।
ધ્યાનનિર્મથનાભ્યાસાત્સાક્ષાત્પશ્યતિ માં જનઃ ॥ ૩૨॥

વેદવાક્યૈરલભ્યોઽહં ન શાસ્ત્રૈર્નાપિ ચેતસા ।
ધ્યાનેન વૃણુતે યો માં સર્વદાહં વૃણોમિ તમ્ ॥ ૩૩॥

નાવિરતો દુશ્ચરિતાન્નાશાન્તો નાસમાહિતઃ ।
નાશાન્તમાનસો વાપિ પ્રજ્ઞાનેન લભેત મામ્ ॥ ૩૪॥

જાગ્રત્સ્વપ્નસુષુપ્ત્યાદિપ્રપઞ્ચો યઃ પ્રકાશતે ।
તદ્બ્રહ્માહમિતિ જ્ઞાત્વા સર્વબન્ધૈઃ પ્રમુચ્યતે ॥ ૩૫॥

ત્રિષુ ધામસુ યદ્ભોગ્યં ભોક્તા ભોગશ્ચ યદ્ભવેત્ ।
તજ્જ્યોતિર્લક્ષણઃ સાક્ષી ચિન્માત્રોઽહં સદાશિવઃ ॥ ૩૬॥

એકો દેવઃ સર્વભૂતેષુ ગૂઢઃ
સર્વવ્યાપી સર્વભૂતાન્તરાત્મા ।
સર્વાધ્યક્ષઃ સર્વભૂતાધિવાસઃ
સાક્ષી ચેતા કેવલો નિર્ગુણશ્ચ ॥ ૩૭
એકો વશી સર્વભૂતાન્તરાત્મા-
પ્યેકં બીજં નિત્યદા યઃ કરોતિ ।
તં માં નિત્યં યેઽનુપશ્યન્તિ ધીરા-
સ્તેષાં શાન્તિઃ શાશ્વતી નેતરેષામ્ ॥ ૩૮॥

અગ્નિર્યથૈકો ભુવનં પ્રવિષ્ટો
રૂપં રૂપં પ્રતિરૂપો બભૂવ ।
એકસ્તથા સર્વભૂતાન્તરાત્મા
ન લિપ્યતે લોકદુઃખેન બાહ્યઃ ॥ ૩૯॥

વેદેહ યો માં પુરુષં મહાન્ત-
માદિત્યવર્ણં તમસઃ પરસ્તાત્ ।
સ એવ વિદ્વાનમૃતોઽત્ર ભૂયા-
ન્નાન્યસ્તુ પન્થા અયનાય વિદ્યતે ॥ ૪૦॥

હિરણ્યગર્ભં વિદધામિ પૂર્વં

વેદાંશ્ચ તસ્મૈ પ્રહિણોમિ યોઽહમ્ ।
તં દેવમીડ્યં પુરુષં પુરાણં
નિશ્ચિત્ય માં મૃત્યુમુખાત્પ્રમુચ્યતે ॥ ૪૧॥

એવં શાન્ત્યાદિયુક્તઃ સન્ વેત્તિ માં તત્ત્વતસ્તુ યઃ ।
નિર્મુક્તદુઃખસંતાનઃ સોઽન્તે મય્યેવ લીયતે ॥ ૪૨॥

ઇતિ શ્રીપદ્મપુરાણે ઉપરિભાગે શિવગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શિવરાઘવસંવાદે
ઉપાસનાજ્ઞાનફલં નામ દ્વાદશોઽધ્યાયઃ ॥ ૧૨ ॥

---

અથ ત્રયોદશોઽધ્યાયઃ ।

સૂત ઉવાચ ॥

એવં શ્રુત્વા કૌસલેયસ્તુષ્ટો મતિમતાં વરઃ ।
પપ્રચ્છ ગિરિજાકાન્તં સુભગં મુક્તિલક્ષણમ્ ॥ ૧॥

શ્રીરામ ઉવાચ ॥

ભગવન્કરુણાવિષ્ટહૃદય ત્વં પ્રસીદ મે ।
સ્વરૂપલક્ષણં મુક્તેઃ પ્રબ્રૂહિ પરમેશ્વર ॥ ૨॥

શ્રીભગવાનુવાચ ॥

સાલોક્યમપિ સારૂપ્યં સાર્ષ્ટ્યં સાયુજ્યમેવ ચ ।
કૈવલ્યં ચેતિ તાં વિદ્ધિ મુક્તિં રાઘવ પઞ્ચધા ॥ ૩॥

માં પૂજયતિ નિષ્કામઃ સર્વદા જ્ઞાનવર્જિતઃ ।
સ મે લોકં સમાસાદ્ય ભુઙ્ક્તે ભોગાન્યથેપ્સિતાન્ ॥ ૪॥

જ્ઞાત્વા માં પૂજયેદ્યસ્તુ સર્વકામવિવર્જિતઃ ।
મયા સમાનરૂપઃ સન્મમ લોકે મહીયતે ॥ ૫॥

ઇષ્ટાપૂર્તાદિ કર્માણિ મત્પ્રીત્યૈ કુરુતે તુ યઃ ।
યત્કરોતિ યદશ્નાતિ યજ્જુહોતિ દદાતિ યત્ ॥ ૬॥

યત્તપસ્યતિ તત્સર્વં યઃ કરોતિ મદર્પણમ્ ।
મલ્લોકે સ શ્રિયં ભુઙ્ક્તે મત્તુલ્યં પ્રાભવં ભજેત્ ॥ ૭॥

યસ્તુ શાન્ત્યાદિયુક્તઃ સન્માત્માત્મત્વેન પશ્યતિ ।
સ જાયતે પરં જ્યોતિરદ્વૈતં બ્રહ્મ કેવલમ્ ।
આત્મસ્વરૂપાવસ્થાનં મુક્તિરિત્યભિધીયતે ॥ ૮॥

સત્યં જ્ઞાનમનન્તં સદાનન્દં બ્રહ્મકેવલમ્ ।
સર્વધર્મવિહીનં ચ મનોવાચામગોચરમ્ ॥ ૯॥

સજાતીયવિજાતીયપદાર્થાનામસંભવાત્ ।
અતસ્તદ્વ્યતિરિક્તાનામદ્વૈતમિતિ સંજ્ઞિતમ્ ॥ ૧૦॥

મત્વા રૂપમિદં રામ શુદ્ધં યદભિધીયતે ।
મય્યેવ દૃશ્યતે સર્વં જગત્સ્થાવરજઙ્ગમમ્ ॥ ૧૧॥

વ્યોમ્નિ ગન્ધર્વનગરં યથા દૃષ્ટં ન દૃશ્યતે ।
અનાદ્યવિદ્યયા વિશ્વં સર્વં મય્યેવ કલ્પ્યતે ॥ ૧૨॥

મમ સ્વરૂપજ્ઞાનેન યદાઽવિદ્યા પ્રણશ્યતિ ।
તદૈક એવ વર્ત્તેઽહં મનોવાચામગોચરઃ ॥ ૧૩॥

સદૈવ પરમાનન્દઃ સ્વપ્રકાશશ્ચિદાત્મકઃ।
ન કાલઃ પઞ્ચભૂતાનિ ન દિશો વિદિશશ્ચ ન ॥ ૧૪॥

મદન્યન્નાસ્તિ યત્કિઞ્ચિત્તદા વર્ત્તેઽહમેકલઃ ॥ ૧૫॥

ન સંદૃશે તિષ્ઠતિ મે સ્વરૂપં
    ન ચક્ષુષા પશ્યતિ માં તુ કશ્ચિત્ ।
હૃદા મનીષા મનસાભિક્લૃપ્તં
    યે માં વિદુસ્તે હ્યમૃતા ભવન્તિ ॥ ૧૬॥

શ્રીરામ ઉવાચ ॥

કથં ભગવતો જ્ઞાનં શુદ્ધં મર્ત્યસ્ય જાયતે ।
તત્રોપાયં હર બ્રૂહિ મયિ તેઽનુગ્રહો યદિ ॥ ૧૭॥

શ્રીભગવાનુવાચ ॥

વિરજ્ય સર્વભૂયેભ્ય આવિરિંચિપદાદપિ ।
ઘૃણાં વિતત્ય સર્વત્ર પુત્રમિત્રાદિકેષ્વપિ ॥ ૧૮॥

શ્રદ્ધાલુર્ભક્તિમાર્ગેષુ વેદાન્તજ્ઞાનલિપ્સયા ।
ઉપાયનકરો ભૂત્વા ગુરું બ્રહ્મવિદં વ્રજેત્ ॥ ૧૯॥

સેવાભિઃ પરિતોષ્યૈનં ચિરકાલં સમાહિતઃ ।
સર્વવેદાન્તવાક્યાર્થં શ‍ૃણુયાત્સુસમાહિતઃ ॥ ૨૦॥

સર્વવેદાન્તવાક્યાનાં મયિ તાત્પર્યનિશ્ચયમ્ ।
શ્રવણં નામ તત્પ્રાહુઃ સર્વે તે બ્રહ્મવાદિનઃ ॥ ૨૧॥

લોહમણ્યાદિદૃષ્ટાન્તયુક્તિભિર્યદ્વિચિન્તનમ્ ।
તદેવ મનનં પ્રાહુર્વાક્યાર્થસ્યોપબૃંહણમ્ ॥ ૨૨॥

નિર્મમો નિરહંકારઃ સમઃ સંગવર્જિતઃ।
સદા શાન્ત્યાદિયુક્તઃ સન્નાત્મન્યાત્માનમીક્ષતે ॥ ૨૩॥

યત્સદા ધ્યાનયોગેન તન્નિદિધ્યાસનં સ્મૃતમ્ ॥ ૨૪॥

સર્વકર્મક્ષયવશાત્સાક્ષાત્કારોઽપિ ચાત્મનઃ ।
કસ્યચિજ્જાયતે શીઘ્રં ચિરકાલેન કસ્યચિત્ ॥ ૨૫॥

કૂટસ્થાનીહ કર્માણિ કોટિજન્માર્જિતાન્યપિ ।
જ્ઞાનેનૈવ વિનશ્યન્તિ ન તુ કર્માયુતૈરપિ ॥ ૨૬॥

જ્ઞાનાદૂર્ધ્વં તુ યત્કિઞ્ચિત્પુણ્યં વા પાપમેવ વા ।
ક્રિયતે બહુ વાલ્પં વા ન તેનાયં વિલિપ્યતે ॥ ૨૭॥

શરીરારમ્ભકં યત્તુ પ્રારબ્ધં કર્મ જન્મિનઃ ।
તદ્ભોગેનૈવ નષ્ટં સ્યાન્ન તુ જ્ઞાનેન નશ્યતિ ॥ ૨૮॥

નિર્મોહો નિરહંકારો નિર્લેપઃ સંગવર્જિતઃ ।
સર્વભૂતેષુ ચાત્માનં સર્વભૂતાનિ ચાત્મનિ ।
યઃ પશ્યન્સંચરત્યેષ જીવન્મુક્તોઽભિધીયતે ॥ ૨૯॥

અહિનિર્લ્વયની યદ્વદ્દ્રષ્ટુઃ પૂર્વં ભયપ્રદા ।
તતોઽસ્ય ન ભયં કિંચિત્તદ્વદ્દ્રષ્ટુરયં જનઃ ॥ ૩૦॥

યદા સર્વે પ્રમુચ્યન્તે કામા યેઽસ્ય વશં ગતાઃ ।
અથ મર્ત્યોઽમૃતો ભવત્યેતાવદનુશાસનમ્ ॥ ૩૧॥

મોક્ષસ્ય ન હિ વાસોઽસ્તિ ન ગ્રામાન્તરમેવ વા ।
અજ્ઞાનહૃદયગ્રન્થિનાશો મોક્ષ ઇતિ સ્મૃતઃ ॥ ૩૨॥

વૃક્ષાગ્રચ્યુતપાદો યઃ સ તદૈવ પતત્યધઃ ।

તદ્વજ્જ્ઞાનવતો મુક્તિર્જાયતે નિશ્ચિતાપિ તુ ॥ ૩૩॥

તીર્થં ચાણ્ડાલગેહે વા યદિ વા નષ્ટચેતનઃ ।
પઐરિત્યજન્દેહમિમં જ્ઞાનાદેવ વિમુચ્યતે ॥ ૩૪॥

સંવીતો યેન કેનાશ્નન્ભક્ષ્યં વાભક્ષ્યમેવ વા ।
શયાનો યત્ર કુત્રાપિ સર્વાત્મા મુચ્યતેઽત્ર સઃ ॥ ૩૫॥

ક્ષીરાદુદ્ધૃતમાજ્યં તત્ક્ષિપ્તં પયસિ તત્પુનઃ ।
ન તેનૈવૈકતાં યાતિ સંસારે જ્ઞાનવાંસ્તથા ॥ ૩૬॥

નિત્યં પઠતિ યોઽધ્યાયમિમં રામ શ‍ૃણોતિ વા ।
સ મુચ્યતે દેહબન્ધાદનાયાસેન રાઘવ ॥ ૩૭॥

અતઃ સંયતચિત્તસ્ત્વં નિત્યં પઠ મહીપતે ।
અનાયાસેન તેનૈવ સર્વથા મોક્ષમાપ્સ્યસિ ॥ ૩૮॥

ઇતિ શ્રીપદ્મપુરાણે ઉપરિભાગે શિવગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શિવરાઘવસંવાદે
મોક્ષયોગો નામ ત્રયોદશોઽધ્યાયઃ ॥ ૧૩ ॥

---

અથ ચતુર્દશોઽધ્યાયઃ ॥

શ્રીરામ ઉવાચ ॥

ભગવન્યદિ તે રૂપં સચ્ચિદાનન્દવિગ્રહમ્ ।
નિષ્કલં નિષ્ક્રિયં શાન્તં નિરવદ્યં નિરઞ્જનમ્ ॥ ૧॥

સર્વધર્મવિહીનં ચ મનોવાચામગોચરમ્ ।
સર્વવ્યાપિતયાત્માનમીક્ષતે સર્વતઃ સ્થિતમ્ ॥ ૨॥

આત્મવિદ્યાતપોમૂલં તદ્બ્રહ્મોપનિષત્પરમ્ ।
અમૂર્તં સર્વભૂતાત્માકારં કારણકારણમ્ ॥ ૩॥

યત્તદદૃશ્યમગ્રાહ્યં તદ્ગ્રાહ્યં વા કથં ભવેત્ ।
અત્રોપાયમજાનાનસ્તેન ખિન્નોઽસ્મિ શંકર ॥ ૪॥

શ્રીભગવાનુવાચ ॥

શ‍ૃણુ રાજન્પ્રવક્ષ્યામિ તત્રોપાયં મહાભુજ ।

સગુણોપાસનાભિસ્તુ ચિત્તૈકાગ્ર્યં વિધાય ચ ॥ ૫॥

સ્થૂલસૌરાંભિકાન્યાયાત્તત્ર ચિત્તં પ્રવર્તયેત્ ।
તસ્મિન્નન્નમયે પિણ્ડે સ્થૂલદેહે તનૂભૃતામ્ ॥ ૬॥

જન્મવ્યાધિજરામૃત્યુનિલયે વર્તતે દૃઢા ॥ ૭॥

આત્મબુદ્ધિરહંમાનાત્કદાચિન્નૈવ હીયતે ।
આત્મા ન જાયતે નિત્યો મ્રિયતે વા કથંચન ॥ ૮॥

સંજાયતેઽસ્તિ વિપરિણમતે વર્ધતે તથા ।
ક્ષીયતે નશ્યતીત્યેતે ષડ્ભાવા વપુષઃ સ્મૃતાઃ ॥ ૯॥

આત્મનો ન વિકારિત્વં ઘટસ્થનભસો યથા ।
એવમાત્માવપુસ્તસ્માદિતિ સંચિન્તયેદ્બુધઃ ॥ ૧૦॥

મૂષાનિક્ષિપ્તહેમાભઃ કોશઃ પ્રાણમયોઽત્ર તુ ।
વર્તતેઽન્તરતો દેહે બદ્ધઃ પ્રાણાદિવાયુભિઃ ॥ ૧૧॥

કર્મેન્દ્રિયૈઃ સમાયુક્તશ્ચલનાદિક્રિયાત્મકઃ ।
ક્ષુત્પિપાસાપરાભૂતો નાયમાત્મા જડો યતઃ ॥ ૧૨॥

ચિદ્રૂપ આત્મા યેનૈવ સ્વદેહમભિપશ્યતિ ।
આત્મૈવ હિ પરં બ્રહ્મ નિર્લેપઃ સુખનીરધિઃ ॥ ૧૩॥

ન તદશ્નાતિ કિંચૈતત્તદશ્નાતિ ન કશ્ચન ॥ ૧૪॥

તતઃ પ્રાણમયે કોશે કોશોઽસ્ત્યેવ મનોમયઃ ।
સ સંકલ્પવિકલ્પાત્મા બુદ્ધીન્દ્રિયસમાયુતઃ ॥ ૧૫॥

કામઃ ક્રોધસ્તથા લોભો મોહો માત્સર્યમેવ ચ ।
મદશ્ચેત્યરિષડ્વર્ગો મમતેચ્છાદયોઽપિ ચ ।
મનોમયસ્ય કોશસ્ય ધર્મા એતસ્ય તત્ર તુ ॥ ૧૬॥

યા કર્મવિષયા બુદ્ધિર્વેદશાસ્ત્રાર્થનિશ્ચિતા ।
સા તુ જ્ઞાનેન્દ્રિયૈઃ સાર્ધં વિજ્ઞાનમયકોશતઃ ॥ ૧૭॥

ઇહ કર્તૃત્વાભિમાની સ એવ તુ ન સંશયઃ ।
ઇહામુત્ર ગતિસ્તસ્ય સ જીવો વ્યાવહારિકઃ ॥ ૧૮॥

વ્યોમાદિસાત્ત્વિકાંશેભ્યો જાયન્તે ધીન્દ્રિયાણિ તુ ।

વ્યોમ્નઃ શ્રોત્રં ભુવો ઘ્રાણં જલાજ્જિહ્વાથ તેજસઃ ॥ ૧૯।
ચક્ષુર્વાયોસ્ત્વગુત્પન્ના તેષાં ભૌતિકતા તતઃ ॥ ૨૦॥

વ્યોમાદીનાં સમસ્તાનાં સાત્ત્વિકાંશેભ્ય એવ તુ ।
જાયન્તે બુદ્ધિમનસી બુદ્ધિઃ સ્યાન્નિશ્ચયાત્મિકા ॥ ૨૧॥

વાક્પાણિપાદપાયૂપસ્થાનિ કર્મેન્દ્રિયાણિ તુ ।
વ્યોમાદીનાં રજોંઽશેભ્યો વ્યસ્તેભ્યસ્તાન્યનુક્રમાત્ ॥ ૨૨॥

સમસ્તેભ્યો રજોંઽશેભ્યઃ પઞ્ચ પ્રાણાદિવાયવઃ ।
જાયન્તે સપ્તદશકમેવં લિઙ્ગશરીરકમ્ ॥ ૨૩॥

એતલ્લિઙ્ગશરીરં તુ તપ્તાયઃપિણ્ડવદ્ધતઃ ।
પરસ્પરાધ્યાસયોગાત્સાક્ષિચૈતન્યસંયુતમ્ ॥ ૨૪॥

તદાનન્દમયઃ કોશો ભોક્તૃત્વં પ્રતિપદ્યતે ।
વિદ્યાકર્મફલાદીનાં ભોક્તેહામુત્ર સ સ્મૃતઃ ॥ ૨૫॥

યદાધ્યાસં વિહાયૈષ સ્વસ્વરૂપેણ તિષ્ઠતિ ।
અવિદ્યામાત્રસંયુક્તઃ સાક્ષ્યાત્મા જાયતે તદા ॥ ૨૬॥

દ્રષ્ટાન્તઃકરણાદીનામનુભૂતેઃ સ્મૃતેરપિ ।
અતોઽન્તઃકરણાધ્યાસાદધ્યાસિત્વેન ચાત્મનઃ ।
ભોક્તૃત્વં સાક્ષિતા ચેતિ દ્વૈધં તસ્યોપપદ્યતે ॥ ૨૭॥

આતપશ્ચાપિ તચ્છાયા તત્પ્રકાશે વિરાજતે ।
એકો ભોજયિતા તત્ર ભુઙ્ક્તેઽન્યઃ કર્મણઃ ફલમ્ ॥ ૨૮॥

ક્ષેત્રજ્ઞં રથિનં વિદ્ધિ શરીરં રથમેવ તુ ।
બુદ્ધિં તુ સારથિં વિદ્ધિ પ્રગ્રહં તુ મનસ્તથા ॥ ૨૯॥

ઇન્દ્રિયાણિ હયાન્વિદ્ધિ વિષયાંસ્તેષુ ગોચરાન્ ।
ઇન્દ્રિયૈર્મનસા યુક્તં ભોક્તારં વિદ્ધિ પૂરુષમ્ ॥ ૩૦॥

એવં શાન્ત્યાદિયુક્તઃ સન્નુપાસ્તે યઃ સદા દ્વિજઃ।
ઉદ્ઘાટ્યોદ્ઘાટ્યૈકમેકં યથૈવ કદલીતરોઃ ॥ ૩૧॥

વલ્કલાનિ તતઃ પશ્ચાલ્લભતે સારમુત્તમમ્ ।
તથૈવ પઞ્ચકોશેષુ મનઃ સંક્રામયન્ક્રમાત્ ।
તેષાં મધ્યે તતઃ સારમાત્માનમપિ વિન્દતિ ॥ ૩૨॥

એવં મનઃ સમાધાય સંયતો મનસિ દ્વિજઃ ।
અથ પ્રવર્તયેચ્ચિત્તં નિરાકારે પરાત્મનિ ॥ ૩૩॥

તતો મનઃ પ્રગૃહ્ણાતિ પરમાત્માનમવ્યયમ્ ।
યત્તદદ્રેશ્યમગ્રાહ્યમસ્થૂલાદ્યુક્તિગોચરમ્ ॥ ૩૪॥

શ્રીરામ ઉવાચ ॥

ભગવચ્છ્રવણે નૈવ પ્રવર્તન્તે જનાઃ કથમ્ ।
વેદશાસ્ત્રાર્થસમ્પન્ના યજ્વાનઃ સત્યવાદિનઃ ॥ ૩૫॥

શ◌ૃણ્વન્તોઽપિ તથાત્માનં જાનતે નૈવ કેચન ।
જ્ઞાત્વાપિ મન્વતે મિથ્યા કિમેતત્તવ માયયા ॥ ૩૬॥

શ્રીભગવાનુવાચ ॥

એવમેવ મહાબાહો નાત્ર કાર્યા વિચારણા ।
દૈવી હ્યેષા ગુણમયી મમ માયા દુરત્યયા ॥ ૩૭॥

મામેવ યે પ્રપદ્યન્તે માયામેતાં તરન્તિ તે ।
અભક્તા યે મહાબાહો મમ શ્રદ્ધા વિવર્જિતાઃ ॥ ૩૮॥

ફલં કામયમાનાસ્તે ચૈહિકામુષ્મિકાદિકમ્ ।
ક્ષયિષ્ણ્વલ્પં સાતિશયં યતઃ કર્મફલં મતમ્ ॥ ૩૯॥

તદવિજ્ઞાય કર્માણિ યે કુર્વન્તિ નરાધમાઃ ।
માતુઃ પતન્તિ તે ગર્ભે મૃત્યોર્વક્ત્રે પુનઃ પુનઃ ॥ ૪૦॥

એવં શાન્ત્યાદિયુક્તઃ સન્નુપાસ્તે યઃ સદા દ્વિજઃ।
ઉદ્ઘાટ્યોદ્ઘાટ્યૈકમેકં યથૈવ કદલીતરોઃ ॥ ૩૧॥

વલ્કલાનિ તતઃ પશ્ચાલ્લભતે સારમુત્તમમ્ ।
તથૈવ પઞ્ચકોશેષુ મનઃ સંક્રામયન્ક્રમાત્ ।
તેષાં મધ્યે તતઃ સારમાત્માનમપિ વિન્દતિ ॥ ૩૨॥

એવં મનઃ સમાધાય સંયતો મનસિ દ્વિજઃ ।
અથ પ્રવર્તયેચ્ચિત્તં નિરાકારે પરાત્મનિ ॥ ૩૩॥

તતો મનઃ પ્રગૃહ્ણાતિ પરમાત્માનમવ્યયમ્ ।
યત્તદદ્રેશ્યમગ્રાહ્યમસ્થૂલાદ્યુક્તિગોચરમ્ ॥ ૩૪॥

શ્રીરામ ઉવાચ ॥

ભગવચ્છ્રવણે નૈવ પ્રવર્તન્તે જનાઃ કથમ્ ।
વેદશાસ્ત્રાર્થસમ્પન્ના યજ્વાનઃ સત્યવાદિનઃ ॥ ૩૫॥

શ્ૃણ્વન્તોઽપિ તથાત્માનં જાનતે નૈવ કેચન ।
જ્ઞાત્વાપિ મન્વતે મિથ્યા કિમેતત્તવ માયયા ॥ ૩૬॥

શ્રીભગવાનુવાચ ॥

એવમેવ મહાબાહો નાત્ર કાર્યા વિચારણા ।
દૈવી હ્યેષા ગુણમયી મમ માયા દુરત્યયા ॥ ૩૭॥

મામેવ યે પ્રપદ્યન્તે માયામેતાં તરન્તિ તે ।
અભક્તા યે મહાબાહો મમ શ્રદ્ધા વિવર્જિતાઃ ॥ ૩૮॥

ફલં કામયમાનાસ્તે ચૈહિકામુષ્મિકાદિકમ્ ।
ક્ષયિષ્ણ્વલ્પં સાતિશયં યતઃ કર્મફલં મતમ્ ॥ ૩૯॥

તદવિજ્ઞાય કર્માણિ યે કુર્વન્તિ નરાધમાઃ ।
માતુઃ પતન્તિ તે ગર્ભે મૃત્યોર્વક્ત્રે પુનઃ પુનઃ ॥ ૪૦॥

નાનાયોનિષુ જાતસ્ય દેહિનો યસ્યકસ્યચિત્ ।
કોટિજન્માર્જિતૈઃ પુણ્યૈર્મયિ ભક્તિઃ પ્રજાયતે ॥ ૪૧॥

સ એવ લભતે જ્ઞાનં મદ્ભક્તઃ શ્રદ્ધયાન્વિતઃ ।
નાન્યકર્માણિ કુર્વાણો જન્મકોટિશતૈરપિ ॥ ૪૨॥

તતઃ સર્વં પરિત્યજ્ય મદ્ભક્તિં સમુદાહર ।
સર્વધર્માન્પરિત્યજ્ય મામેકં શરણં વ્રજ ॥ ૪૩॥

અહં ત્વા સર્વપાપેભ્યો મોક્ષયિષ્યામિ મા શુચઃ ।
યત્કરોષિ યદશ્નાસિ યજ્જુહોષિ દદાસિ યત્ ॥ ૪૪॥

યત્તપસ્યસિ રામ ત્વં તત્કુરુષ્વ મદર્પણમ્ ।
તતઃ પરતરા નાસ્તિ ભક્તિર્મયિ રઘૂત્તમ ॥ ૪૫॥

ઇતિ શ્રીપદ્મપુરાણે ઉપરિભાગે શિવગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શિવરાઘવસંવાદે
પઞ્ચકોશોપપાદનં નામ ચતુર્દશોઽધ્યાયઃ ॥ ૧૪ ॥

અથ પઞ્ચદશોઽધ્યાયઃ ॥

શ્રીરામ ઉવાચ ॥

ભક્તિસ્તે કીદૃશી દેવ જાયતે વા કથંચન ।
યયા નિર્વાણરૂપં તુ લભતે મોક્ષમુત્તમમ્ ।
તદ્ બ્રૂહિ ગિરિજાકાન્ત મયિ તેઽનુગ્રહો યદિ ॥ ૧॥

શ્રીભગવાનુવાચ ॥

યો વેદાધ્યયનં યજ્ઞં દાનાનિ વિવિધાનિ ચ ।
મદર્પણધિયા કુર્યાત્સ મે ભક્તઃ સ મે પ્રિયઃ ॥ ૨॥

નર્યભસ્મ સમાદાય વિશુદ્ધં શ્રોત્રિયાલયાત્ ।
અગ્નિરિત્યાદિભિર્મન્ત્રૈરભિમન્ત્ર્ય યથાવિધિ ॥ ૩॥

ઉદ્ધૂલયતિ ગાત્રાણિ તેન ચાર્ચતિ મામપિ ।
તસ્માત્પરતરા ભક્તિર્મમ રામ ન વિદ્યતે ॥ ૪॥

સર્વદા શિરસા કણ્ઠે રુદ્રાક્ષાન્ધારયેત્તુ યઃ ।
પઞ્ચાક્ષરીજપરતઃ  સ મે ભક્તઃ સ મે પ્રિયઃ ॥ ૫॥

ભસ્મચ્છન્નો ભસ્મશાયી સર્વદા વિજિતેન્દ્રિયઃ ।
યસ્તુ રુદ્રં જપેન્નિત્યં ચિન્તયેન્મામનન્યધીઃ ॥ ૬॥

સ તેનૈવ ચ દેહેન શિવઃ સંજાયતે સ્વયમ્ ।
જપેદ્યો રુદ્રસૂક્તાનિ તથાથર્વશિરઃ પરમ્ ॥ ૭॥

કૈવલ્યોપનિષત્સૂક્તં શ્વેતાશ્વતરમેવ ચ ।
તતઃ પરતરો ભક્તો મમ લોકે ન વિદ્યતે ॥ ૮॥

અન્યત્ર ધર્માદન્યસ્માદન્યત્રાસ્માત્કૃતાકૃતાત્ ।
અન્યત્ર ભૂતાદ્ભવ્યાચ્ચ યત્પ્રવક્ષ્યામિ તચ્છૃણુ ॥ ૯॥

વદન્તિ યત્પદં વેદાઃ શાસ્ત્રાણિ વિવિધાનિ ચ ।
સર્વોપનિષદાં સારં દધ્નો ઘૃતમિવોદ્ધૃતમ્ ॥ ૧૦॥

યદિચ્છન્તો બ્રહ્મચર્યં ચરન્તિ મુનયઃ સદા ।
તત્તે પદં સંગ્રહેણ બ્રવીમ્યોમિતિ યત્પદમ્ ॥ ૧૧॥

એતદેવાક્ષરં બ્રહ્મ એતદેવાક્ષરં પરમ્ ।
એતદેવાક્ષરં જ્ઞાત્વા બ્રહ્મલોકે મહીયતે ॥ ૧૨॥

છન્દસાં યસ્તુ ધેનૂનામૃષભત્વેન ચોદિતઃ ।
ઇદમેવ પતિઃ સેતુરમૃતસ્ય ચ ધારણાત્ ॥ ૧૩॥

મેધસા પિહિતે કોશે બ્રહ્મ યત્પરમોમિતિ ॥ ૧૪॥

ચતસ્રસ્તસ્ય માત્રાઃ સ્યુરકારોકારકૌ તથા ।
મકારશ્ચાવસાનેઽર્ધમાત્રેતિ પરિકીર્તિતા ॥ ૧૫॥

પૂર્વત્ર ભૂશ્ચ ઋગ્વેદો બ્રહ્માષ્ટવસવસ્તથા ।
ગાર્હપત્યશ્ચ ગાયત્રી ગઙ્ગા પ્રાતઃસવસ્તથા ॥ ૧૬॥

દ્વિતીયા ચ ભુવો વિષ્ણૂ રુદ્રોઽનુષ્ટુબ્યજુસ્તથા ।
યમુના દક્ષિણાગ્નિશ્ચ માધ્યન્દિનસવસ્તથા ॥ ૧૭॥

તૃતીયા ચ સુવઃ સામાન્યાદિત્યશ્ચ મહેશ્વરઃ ।
અગ્નિરાહવનીયશ્ચ જગતી ચ સરસ્વતી ॥ ૧૮॥

તૃતીયં સવનં પ્રોક્તમથર્વત્વેન યન્મતમ્ ।
ચતુર્થી યાવસાનેઽર્ધમાત્રા સા સોમલોકગા ॥ ૧૯॥

અથર્વાઙ્ગિરસઃ સંવર્તકોઽગ્નિશ્ચ મહસ્તથા ।
વિરાટ્ સભ્યાવસથ્યૌ ચ શુતુદ્રિર્યજ્ઞપુચ્છકઃ॥ ૨૦॥

પ્રથમા રક્તવર્ણા સ્યાદ્ દ્વિતીયા ભાસ્વરા મતા ।
તૃતીયા વિદ્યુદાભા સ્યાચ્ચતુર્થી શુક્લવર્ણિની ॥ ૨૧॥

સર્વં જાતં જાયમાનં તદોઙ્કારે પ્રતિષ્ઠિતમ્ ।
વિશ્વં ભૂતં ચ ભુવનં વિચિત્રં બહુધા તથા ॥ ૨૨॥

જાતં ચ જાયમાનં યત્તત્સર્વં રુદ્ર ઉચ્યતે ।
તસ્મિન્નેવ પુનઃ પ્રાણાઃ સર્વમોઙ્કાર ઉચ્યતે ॥ ૨૩॥

પ્રવિલીનં તદોઙ્કારે પરં બ્રહ્મ સનાતનમ્ ।
તસ્માદોઙ્કારજાપી યઃ સ મુક્તો નાત્ર સંશયઃ ॥ ૨૪॥

ત્રેતાગ્નેઃ સ્માર્તવહ્નેર્વા શૈવાગ્નેર્વા સમાહૃતમ્ ।
ભસ્માભિમન્ત્ર્ય યો માં તુ પ્રણવેન પ્રપૂજયેત્ ॥ ૨૫॥

તસ્માત્પરતરો ભક્તો મમ લોકે ન વિદ્યતે ॥ ૨૬॥

શાલાગ્નેર્દાવવહ્નેર્વા ભસ્માદાયાભિમન્ત્રિતમ્ ।
યો વિલિમ્પતિ ગાત્રાણિ સ શૂદ્રોઽપિ વિમુચ્યતે ॥ ૨૭॥

કુશપુષ્પૈર્બિલ્વદલૈઃ પુષ્પૈર્વા ગિરિસંભવૈઃ ।
યો મામર્ચયતે નિત્યં પ્રણવેન પ્રિયો હિ સઃ ॥ ૨૮॥

પુષ્પં ફલં સમૂલં વા પત્રં સલિલમેવ વા ।
યો દદ્યાત્પ્રણવૈર્મહ્યં તત્કોટિગુણિતં ભવેત્ ॥ ૨૯॥

અહિંસા સત્યમસ્તેયં શૌચમિન્દ્રિયનિગ્રહઃ ।
યસ્યાસ્ત્યધ્યયનં નિત્યં સ મે ભક્તઃ સ મે પ્રિયઃ ॥ ૩૦॥

પ્રદોષે યો મમ સ્થાનં ગત્વા પૂજયતે તુ મામ્ ।
સ પરં શ્રિયમાપ્નોતિ પશ્ચાન્મયિ વિલીયતે ॥ ૩૧॥

અષ્ટમ્યાં ચ ચતુર્દશ્યાં પર્વણોરુભયોરપિ ।
ભૂતિભૂષિતસર્વાંગો યઃ પૂજયતિ માં નિશિ ॥ ૩૨॥

કૃષ્ણપક્ષે વિશેષેણ સ મે ભક્તઃ સ મે પ્રિયઃ ॥ ૩૩॥

એકાદશ્યામુપોષ્યૈવ યઃ પૂજયતિ માં નિશિ ।
સોમવારે વિશેષેણ સ મે ભક્તો ન નશ્યતિ ॥ ૩૪॥

પઞ્ચામૃતૈઃ સ્નાપયેદ્યઃ પઞ્ચગવ્યેન વા પુનઃ ।
પુષ્પોદકૈઃ કુશજલૈસ્તસ્માન્નન્યઃ પ્રિયો મમ ॥ ૩૫॥

પયસા સર્પિષા વાપિ મધુનેક્ષુરસેન વા ।
પક્વામ્રફલજેનાપિ નારિકેરજલેન વા ॥ ૩૬॥

ગન્ધોદકેન વા માં યો રુદ્રમન્ત્રં સમુચ્ચરન્ ।
અભિષિઞ્ચેત્તતો નાન્યઃ કશ્ચિત્પ્રિયતરો મમ ॥ ૩૭॥

આદિત્યાભિમુખો ભૂત્વા ઊર્ધ્વબાહુર્જલે સ્થિતઃ ।
માં ધ્યાયન્ રવિબિમ્બસ્થમથર્વાંગિરસ જપેત્ ॥ ૩૮॥

પ્રવિશેન્મે શરીરેઽસૌ ગૃહં ગૃહપતિર્યથા ।
બૃહદ્રથન્તરં વામદેવ્યં દેવવ્રતાનિ ચ ॥ ૩૯॥

તદ્યોગયાજ્યદોહાંશ્ચ યો ગાયતિ મમાગ્રતઃ ।

ઇહ શ્રિયં પરાં ભુક્ત્વા મમ સાયુજ્યમાપ્નુયાત્ ॥ ૪૦॥

ઈશાવાસ્યાદિ મન્ત્રાન્ યો જપેન્નિત્યં મમાગ્રતઃ ।
મત્સાયુજ્યમવાપ્નોતિ મમ લોકે મહીયતે ॥ ૪૧॥

ભક્તિયોગો મયા પ્રોક્ત એવં રઘુકુલોદ્ભવ ।
સર્વકામપ્રદો મત્તઃ કિમન્યચ્છ્રોતુમિચ્છસિ ॥ ૪૨॥

ઇતિ શ્રીપદ્મપુરાણે ઉપરિભાગે શિવગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શિવરાઘવસંવાદે
ભક્તિયોગો નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૧૫ ॥

---

અથ ષોડશોઽધ્યાયઃ ॥

શ્રીરામ ઉવાચ ॥

ભગવન્મોક્ષમાર્ગો યસ્ત્વયા સમ્યગુદાહૃતઃ ।
તત્રાધિકારિણં બ્રૂહિ તત્ર મે સંશયો મહાન્ ॥ ૧॥

શ્રીભગવાનુવાચ ॥

બ્રહ્મક્ષત્રવિશઃ શૂદ્રાઃ સ્ત્રિયશ્ચાત્રાધિકારિણઃ ।
બ્રહ્મચારી ગૃહસ્થો વા।આનુપનીતોઽથવા દ્વિજઃ ॥ ૨॥

વનસ્થો વાઽવનસ્થો વા યતિઃ પાશુપતવ્રતી ।
બહુનાત્ર કિમુક્તેન યસ્ય ભક્તિઃ શિવાર્ચને ॥ ૩॥

સ એવાત્રાધિકારી સ્યાન્નાન્યચિત્તઃ કથંચન ।
જડોઽન્ધો બધિરો મૂકો નિઃશૌચઃ કર્મવર્જિતઃ ॥ ૪॥

અજ્ઞોપહાસકાભક્તા ભૂતિરુદ્રાક્ષધારિણઃ ।
લિંગિનો યશ્ચ વા દ્વેષ્ટિ તે નૈવાત્રાધિકારિણઃ ॥ ૫॥

યો માં ગુરું પાશુપતં વ્રતં દ્વેષ્ટિ ધરાધિપ ।
વિષ્ણું વા ન સ મુચ્યેત જન્મકોટિશતૈરપિ ॥ ૬॥

અનેકકર્મસક્તોઽપિ શિવજ્ઞાનવિવર્જિતઃ ।
શિવભક્તિવિહીનશ્ચ સંસારાન્નૈવ મુચ્યતે ॥ ૭॥

આસક્તાઃ ફલરાગેણ યે ત્વવૈદિકકર્મણિ ।

દૃષ્ટમાત્રફલાસ્તે તુ ન મુક્તાવધિકારિણઃ ॥ ૮॥

અવિમુક્તે દ્વારકાયાં શ્રીશૈલે પુણ્ડરીકકે ।
દેહાન્તે તારકં બ્રહ્મ લભતે મદનુગ્રહાત્ ॥ ૯॥

યસ્ય હસ્તૌ ચ પાદૌ ચ મનશ્ચૈવ સુસંયતમ્ ।
વિદ્યા તપશ્ચ કીર્તિશ્ચ સ તીર્થફલમશ્નુતે ॥ ૧૦॥

વિપ્રસ્યાનુપનીતસ્ય વિધિરેવમુદાહૃતઃ ।
નાભિવ્યાહારયેદ્બ્રહ્મ સ્વધાનિનયનાદૃતે ॥ ૧૧॥

સ શૂદ્રેણ સમસ્તાવદ્યાવદ્વેદાન્ન જાયતે ।
નામસંકીર્તને ધ્યાને સર્વ એવાધિકારિણઃ ॥ ૧૨॥

સંસારાન્મુચ્યતે જન્તુઃ શિવતાદાત્મ્યભાવનાત્ ।
તથા દાનં તપો વેદાધ્યયનં ચાન્યકર્મ વા ।
સહસ્રાંશં તુ નાર્હન્તિ સર્વદા ધ્યાનકર્મણઃ ॥ ૧૩॥

જાતિમાશ્રમમઙ્ગાનિ દેશં કાલમથાપિ વા ।
આસનાદીનિ કર્માણિ ધ્યાનં નાપેક્ષતે ક્વચિત્ ॥ ૧૪॥

ગચ્છંસ્તિષ્ઠન્ જપન્વાપિ શયાનો વાન્યકર્મણિ ।
પાતકેનાપિ વા યુક્તો ધ્યાનાદેવ વિમુચ્યતે ॥ ૧૫॥

નેહાભિક્રમનાશોઽસ્તિ પ્રત્યવાયો ન વિદ્યતે ।
સ્વલ્પમપ્યસ્ય ધર્મસ્ય ત્રાયતે મહતો ભયાત્ ॥ ૧૬॥

આશ્ચર્યે વા ભયે શોકે ક્ષુતે વા મમ નામ યઃ ।
વ્યાજેનાપિ સ્મરેદ્યસ્તુ સ યાતિ પરમાં ગતિમ્ ॥ ૧૭॥

મહાપાપૈરપિ સ્પૃષ્ટો દેહાન્તે યસ્તુ માં સ્મરેત્ ।
પઞ્ચાક્ષરીં વોચ્ચરતિ સ મુક્તો નાત્ર સંશયઃ ॥ ૧૮॥

વિશ્વં શિવમયં યસ્તુ પશ્યત્યાત્માનમાત્મના ।
તસ્ય ક્ષેત્રેષુ તીર્થેષુ કિં કાર્યં વાન્યકર્મસુ ॥ ૧૯॥

સર્વેણ સર્વદા કાર્યં ભૂતિરુદ્રાક્ષધારણમ્ ।
યુક્તેનાથાપ્યયુક્તેન શિવભક્તિમભીપ્સતા ॥ ૨૦॥

નર્યભસ્મસમાયુક્તો રુદ્રાક્ષાન્યસ્તુ ધારયેત્ ।
મહાપાપૈરપિ સ્પૃષ્ટો મુચ્યતે નાત્ર સંશયઃ ॥ ૨૧॥

અન્યાનિ શૈવકર્માણિ કરોતુ ન કરોતુ વા ।
શિવનામ જપેદ્યસ્તુ સર્વદા મુચ્યતે તુ સઃ ॥ ૨૨॥

અન્તકાલે તુ રુદ્રાક્ષાન્વિભૂતિં ધારયેત્તુ યઃ ।
મહાપાપોપપાપોઘૈરપિ સ્પૃષ્ટો નરાધમઃ ॥ ૨૩॥

સર્વથા નોપસર્પન્તિ તં જનં યમકિંકરાઃ ॥ ૨૪॥

બિલ્વમૂલમૃદા યસ્તુ શરીરમુપલિમ્પતિ ।
અન્તકાલેઽન્તકજનૈઃ સ દૂરીક્રિયતે નરઃ ॥ ૨૫॥

શ્રીરામ ઉવાચ ॥

ભગવન્પૂજિતઃ કુત્ર કુત્ર વા ત્વં પ્રસીદસિ ।
તદ્બ્રૂહિ મમ જિજ્ઞાસા વર્તતે મહતી વિભો ॥ ૨૬॥

શ્રીભગવાનુવાચ ॥

મૃદા વા ગોમયેનાપિ ભસ્મના ચન્દનેન વા ।
સિકતાભિર્દારુણા વા પાષાણેનાપિ નિર્મિતા ॥ ૨૭॥

લોહેન વાથ રઙ્ગેણ કાંસ્યખર્પરપિત્તલૈઃ ।
તામ્રરૌપ્યસુવર્ણૈર્વા રત્નૈર્નાનાવિધૈરપિ ॥ ૨૮॥

અથવા પારદેનૈવ કર્પૂરેણાથવા કૃતા ।
પ્રતિમા શિવલિઙ્ગં વા દ્રવ્યૈરેતૈઃ કૃતં તુ યત્ ॥ ૨૯॥

તત્ર માં પૂજયેત્તેષુ ફલં કોટિગુણોત્તરમ્ ॥ ૩૦॥

મૃદ્દારુકાંસ્યલોહૈશ્ચ પાષાણેનાપિ નિર્મિતા ।
ગૃહિણા પ્રતિમા કાર્યા શિવં શશ્વદભીપ્સતા ।
આયુઃ શ્રિયં કુલં ધર્મં પુત્રાનાપ્નોતિ તૈઃ ક્રમાત્ ॥ ૩૧॥

બિલ્વવૃક્ષે તત્ફલે વા યો માં પૂજયતે નરઃ ।
પરાં શ્રિયમિહ પ્રાપ્ય મમ લોકે મહીયતે ॥ ૩૨॥

બિલ્વવૃક્ષં સમાશ્રિત્ય યો મન્ત્રાન્વિધિના જપેત્ ।
એકેન દિવસેનૈવ તત્પુરશ્ચરણં ભવેત્ ॥ ૩૩॥

યસ્તુ બિલ્વવને નિત્યં કુટીં કૃત્વા વસેન્નરઃ ।

સર્વે મન્ત્રાઃ પ્રસિદ્ધ્યન્તિ જપમાત્રેણ કેવલમ્ ॥ ૩૪॥

પર્વતાગ્રે નદીતીરે બિલ્વમૂલે શિવાલયે ।
અગ્નિહોત્રે કેશવસ્ય સંનિધૌ વા જપેત્તુ યઃ ॥ ૩૫॥

નૈવાસ્ય વિઘ્નં કુર્વન્તિ દાનવા યક્ષરાક્ષસઃ ।
તં ન સ્પૃશન્તિ પાપાનિ શિવસાયુજ્યમૃચ્છતિ ॥ ૩૬॥

સ્થણ્ડિલે વા જલે વહ્નૌ વાયાવાકાશ એવ વા ।
ગિરૌ સ્વાત્મનિ વા યો માં પૂજયેત્પ્રયતો નરઃ ॥ ૩૭॥

સ કૃત્સ્નં ફલમાપ્નોતિ લવમાત્રેણ રાઘવ ।
આત્મપૂજાસમા નાસ્તિ પૂજા રઘુકુલોદ્ભવ ॥ ૩૮॥

મત્સાયુજ્યમવાપ્નોતિ ચણ્ડાલોઽપ્યાત્મપૂજયા ।
સર્વાન્કામાનવાપ્નોતિ મનુષ્યઃ કમ્બલાસને ॥ ૩૯॥

કૃષ્ણાજિને ભવેન્મુક્તિર્મોક્ષશ્રીર્વ્યાઘ્રચર્મણિ ।
કુશાસને ભવેજ્જ્ઞાનમારોગ્યં પત્રનિર્મિતે ॥ ૪૦॥

પાષાણે દુઃખમાપ્નોતિ કાષ્ઠે નાનાવિધાન્ ગદાન્ ।
વસ્ત્રેણ શ્રિયમાપ્નોતિ ભૂમૌ મન્ત્રો ન સિદ્ધ્યતિ ।
પ્રાઙ્મુખોદઙ્મુખો વાપિ જપં પૂજાં સમાચરેત્ ॥ ૪૧॥

અક્ષમાલાવિધિં વક્ષ્યે શ ૃણુષ્વાવહિતો નૃપ ॥ ૪૨॥

સામ્રાજ્યં સ્ફાટિકે સ્યાત્તુ પુત્રજીવે પરાં શ્રિયમ્ ।
આત્મજ્ઞાનં કુશગ્રન્થૌ રુદ્રાક્ષઃ સર્વકામદઃ ॥ ૪૩॥

પ્રવાલૈશ્ચ કૃતા માલા સર્વલોકવશપ્રદા ।
મોક્ષપ્રદા ચ માલા સ્યાદામલક્યાઃ ફલૈઃ કૃતા ॥ ૪૪॥

મુક્તાફલૈઃ કૃતા માલા સર્વવિદ્યાપ્રદાયિની ।
માણિક્યરચિતા માલા ત્રૈલોકસ્ય વશંકરી ॥ ૪૫॥

નીલૈર્મરકતૈર્વાપિ કૃતા શત્રુભયપ્રદા ।
સુવર્ણરચિતા માલા દદ્યાદ્વૈ મહતીં શ્રિયમ્ ॥ ૪૬॥

તથા રૌપ્યમયી માલા કન્યાં યચ્છતિ કામિતામ્ ।
ઉક્તાનાં સર્વકામાનાં દાયિની પારદૈઃ કૃતા ॥ ૪૭॥

અષ્ટોત્તરશતા માલા તત્ર સ્યાદુત્તમોત્તમા ।
શતસંખ્યોત્તમા માલા પઞ્ચાશન્મધ્યમા મતા ॥ ૪૮॥

ચતુઃ પઞ્ચશતી યદ્વા અધમા સપ્તવિંશતિઃ ।
અધમા પઞ્ચવિંશત્યા યદિ સ્યાચ્છતનિર્મિતા ॥ ૪૯॥

પઞ્ચાશદક્ષરાણ્યત્રાનુલોમપ્રતિલોમતઃ ।
ઇત્યેવં સ્થાપયેત્સ્પષ્ટં ન કસ્મૈચિત્પ્રદર્શયેત્ ॥ ૫૦॥

વર્ણૈર્વિન્યસ્તયા યસ્તુ ક્રિયતે માલયા જપઃ ।
એકવારેણ તસ્યૈવ પુરશ્ચર્યા કૃતા ભવેત્॥ ૫૧॥

સવ્યપાર્ષ્ણિં ગુદે સ્થાપ્ય દક્ષિણં ચ ધ્વજોપરિ ।
યોનિમુદ્રાબન્ધ એષ ભવેદાસનમુત્તમમ્ ॥ ૫૨॥

યોનિમુદ્રાસને સ્થિત્વા પ્રજપેદ્યઃ સમાહિતઃ ।
યં કંચિદપિ વા મન્ત્રં તસ્ય સ્યુઃ સર્વસિદ્ધયઃ ॥ ૫૩॥

છિન્ના રુદ્ધાઃ સ્તમ્ભિતાશ્ચ મિલિતા મૂર્છિતાસ્તથા ।
સુપ્તા મત્તા હીનવીર્યા દગ્ધાસ્ત્રસ્તારિપક્ષગાઃ ॥ ૫૪॥

બાલા યૌવનમત્તશ્ચ વૃદ્ધા મન્ત્રાશ્ચ યે મતાઃ ।
યોનિમુદ્રાસને સ્થિત્વા મન્ત્રાનેવંવિધાન્ જપેત્ ॥ ૫૫॥

તત્ર સિદ્ધ્યન્તિ તે મન્ત્રા નાન્યસ્ય તુ કથંચન ।
બ્રાહ્મં મુહૂર્તમારભ્યામધ્યાહ્નં પ્રજપેન્મનુમ્ ॥ ૫૬॥

અત ઊર્ધ્વં કૃતે જાપ્યે વિનાશાય ભવેદ્ધ્રુવમ્ ।
પુરશ્ચર્યાવિધાવેવં સર્વકામ્યફલેષ્વપિ ॥ ૫૭॥

નિત્યે નૈમિત્તિકે વાપિ તપશ્ચર્યાસુ વા પુનઃ ।
સર્વદૈવ જપઃ કાર્યો ન દોષસ્તત્ર કશ્ચન ॥ ૫૮॥

યસ્તુ રુદ્રં જપેન્નિત્યં ધ્યાયમાનો મમાકૃતિમ્ ।
ષડક્ષરં વા પ્રણવં નિષ્કામો વિજિતેન્દ્રિયઃ ॥ ૫૯॥

તથાથર્વશિરોમન્ત્રં કૈવલ્યં વા રઘૂત્તમ ।
સ તેનૈવ ચ દેહેન શિવઃ સંજાયતે સ્વયમ્ ॥ ૬૦॥

અધીતે શિવગીતાં યો નિત્યમેતાં જિતેન્દ્રિયઃ ।
શ઼ૃણુયાદ્વા સ મુક્તઃ સ્યાત્સંસારાન્નાત્ર સંશયઃ ॥ ૬૧॥

સૂત ઉવાચ ॥

એવમુક્ત્વા મહાદેવસ્તત્રૈવાન્તરધીયત ।
રામઃ કૃતાર્થમાત્માનમમન્યત તથૈવ સઃ ॥ ૬૨॥

એવં મયા સમાસેન શિવગીતા સમીરિતા ।
એતાં યઃ પ્રજપેન્નિત્યં શ‍ૃણુયાદ્વા સમાહિતઃ ॥ ૬૩॥

એકાગ્રચિત્તોયો મર્ત્યસ્તસ્ય મુક્તિઃ કરે સ્થિતા ।
અતઃ શ‍ૃણુધ્વં મુનયો નિત્યમેતાં સ્માહિતાઃ ॥ ૬૪॥

અનાયાસેન વો મુક્તિર્ભવિતા નાત્ર સંશયઃ ।
કાયક્લેશો મનઃક્ષોભો ધનહાનિર્ન ચાત્મનઃ ॥ ૬૫॥

પીડાસ્તિ શ્રવણાદેવ યસ્માત્કૈવલ્યમાપ્નુયાત્ ।
શિવગીતામતો નિત્યં શ‍ૃણુધ્વમૃષિસત્તમાઃ ॥ ૬૬॥

ઋષય ઊચુઃ ॥

અદ્યપ્રભૃતિ નઃ સૂત ત્વમાચાર્યઃ પિતા ગુરુઃ ।
અવિદ્યાયાઃ પરં પારં યસ્માત્તારયિતાસિ નઃ ॥ ૬૭॥

ઉત્પાદકબ્રહ્મદાત્રોર્ગરીયાન્ બ્રહ્મદઃ પિતા ।
તસ્માત્સૂતાત્મજ ત્વત્તઃ સત્યં નાન્યોઽસ્તિ નો ગુરુઃ ॥ ૬૮॥

વ્યાસ ઉવાચ ॥

ઇત્યુક્ત્વા પ્રયયુઃ સર્વે સાયંસંધ્યામુપાસિતુમ્ ।
સ્તુવન્તઃ સૂતપુત્રં તે સંતુષ્ટા ગોમતીતટમ્ ॥ ૬૯॥

ઇતિ શ્રીપદ્મપુરાણે ઉપરિભાગે શિવગીતાસૂપનિષત્સુ
બ્રહ્મવિદ્યાયાં યોગશાસ્ત્રે શિવરાઘવસંવાદે
ગીતાધિકારિનિરૂપણં નામ ષોડશોઽધ્યાયઃ ॥ ૧૬॥

॥ ઇતિ શ્રીમચ્છિવગીતા સમાપ્તા ॥

Encoded and proofread by Sunder Hatangadi

*Shiva Gita*

pdf was typeset on August 28, 2021

Please send corrections to *sanskrit@cheerful.com*